मुक्त्यर्थमसृजच्चेन्न प्राक् सतां सा हि संभवेत् ।
असतोऽपि समुत्पाद्य किमिच्छन्मोचयेदसौ ॥२२॥
परेषु दुःखमालक्ष्य यः शोकः सा दयोच्यते ।
असत्सु हि कुतो दुःखं तस्माच्नेह दयाप्युत ॥२३॥
स्वर्गैकदित्सया लोका असृक्ष्यन्तेश्वरेण चेत् ।
वृथा मध्ये मनुष्यत्वं नाधास्पदमदास्यत ॥२४॥

---

१ आ पुस्तकेऽत आरभ्य त्रीणि पत्राणि नष्टानि.

सद्यःसृष्टेषु जीवेषु नांहःसंभावनाप्यपि ।
न चांहोवासना वापि कुतो हीशस्तथा सृजेत् ॥२५॥
तेषां स्वर्गाय सृष्टानामीशेनौदार्यतो नृणाम् ।
मध्ये मनुष्यभावस्य न पश्यामः प्रयोजनम् ॥२६॥
दातुं किमेषं[1] सर्वेभ्योऽशक्नुवन् स्वर्गमीश्वरः ।
मध्ये मनुष्यतां प्राप्य कुर्युरेन इतीच्छति ॥२७॥
बाल्य एव प्रमीता ये बाल्याद् भ्रान्तधियश्च ये ।
तेषां च नरताप्राप्तेर्नेतरामर्थ ईक्ष्यते[2] ॥२८॥
सम्यग्विचार्यमाणं चेद्भवतामीदृशं मतम् ।
सुधियां पुरतो भाति सर्वं मुग्धोदितार्थकम् ॥२९॥
किं चेशः कुरुते लोकान्यदि स्वर्गैकदित्सया ।
नृणां धर्मं स्वसेवादिमेष कस्मादपेक्षते ॥३०॥
मुक्तिदानविधौ सेवामिच्छतीत्युच्यते यदि ।
पूर्णकामत्वमीशस्य भवता किं न दूषितम् ॥३१॥
केवलं स्वर्गदानार्थं लोकांश्चेत्सृष्टवान्विभुः ।
बुद्धिमेषां कुतोऽस्राक्षीद्धर्माधर्मोभयानुगाम् ॥३२॥
धर्माधर्मक्रियास्वेभ्यः स्वातन्त्र्ये च समर्पिते ।
प्रायेण जायते लोकः सर्वोऽपि निरयातिथिः ॥३३॥
तथा सति नृणां सृष्टिर्नरकार्थापि सेत्स्यति ।
स्वातन्त्र्यं नरकायापि स्वर्गायापि हि कल्प्यते ॥३४॥

---

१ 'किमेव'—इ. 'इक्ष्यते'—इ.

ईशसृष्टाश्च पुरुषाः प्रायः सर्वेऽहसाप्लुताः ।
दूरे मुक्तिकथा तस्माद् वृथाकामः किमीश्वरः ॥३५॥
मया सृष्टा भविष्यन्ति किं चैते पापिनस्त्विति ।
भूतभव्यभवज्ज्ञत्वाज्जानात्येव किलेश्वरः ॥३६॥
इति जानन्नपीशस्तान्सृजत्येव यदा तदा ।
जीवोत्पादकता तस्य कथं स्यान्मुक्तिदित्सया ॥३७॥
सर्वं चोत्पत्तिमद्वस्तु नियमेनान्तवन्मतम् ।
जीवाश्चोत्पत्तिमन्तश्चेद्भवेयुर्नाशधर्मिणः ॥३८॥
कार्यासामान्यहेतोरप्यार्यैः कार्यत्वमिष्यते ।
जीवासामान्यहेतौ स्यात्तत ईशेऽप्यनित्यता ॥३९॥
यदि नित्यस्थिति भवेत्कार्यासामान्यकारणम् ।
कार्यं सदा प्रसज्येत ततोऽनित्यं तदुच्यते ॥४०॥
एवं बहुविधा दोषा जीवोत्पत्तिमते स्थिताः ।
निसर्गात्पौरुषी बुद्धिः सूक्ष्मार्थेषु हि मुह्यति ॥४१॥
वयं तु कर्मणा देहो देहात्कर्मेत्यनादिनीम् ।
बीजाङ्कुरवदिच्छामः कर्मदेहपरम्पराम् ॥४२॥
यद्यत्करोति चेशस्तज्जीवकर्मफलाप्तये ।
यस्य यस्य यथा कर्म न्याय्यं तस्य तथा फलम् ॥४३॥
अत एवास्ति यः प्रोक्तः संग्रामः कृष्णशूलिनोः ।
सोऽपि जीवादृष्टवशात्तद्वज्जयपराजयौ ॥४४॥

एकात्मानौ हि तौ देवौ भिन्नौ दृष्टिभिदावशात् ।
तयोः कथं स्यात्कलहः का च तस्मात्तयोः क्षतिः ॥४५॥
किं तु यत्पक्षपातेन युध्यतस्तौ परस्परम् ।
तत्कर्मतारतम्येन तयोर्जयपराजयौ ॥४६॥
नास्त्येव परमेशस्य पक्षपातोऽपि वस्तुतः ।
किं तु यस्य यथा कर्म तादृशं नियतं फलम् ॥४७॥
स्ववशोऽपि जगन्नाथो न्यायसंरक्षणाय वै ।
तत्तत्कर्मानुसारेण करोति विविधाः क्रियाः ॥४८॥
ननु पुंसामनादित्वे कथमीश्वरजीवयोः ।
सेव्यसेवकभावः स्यादिति चेत्का न्विह क्षतिः ॥४९॥
यथैककालजनुषोर्लोके हि स्वामिभृत्ययोः ।
सेव्यसेवकभावस्य नास्ति हानिस्तु सर्वथा ॥५०॥
तथामोघानन्तशक्तिज्ञानस्य परमात्मनः ।
युज्यन्ते सेवका जीवा अल्पज्ञाः क्षुद्रशक्तयः ॥५१॥
किं च प्राग्जन्मजं कर्म नोररीक्रियते यदि ।
जन्मतोऽन्धाः पङ्गवश्च जायन्ते प्राणिनः कुतः ॥५२॥
नाणुरप्यपराधो यैरीशस्याकारि जन्तुभिः ।
अत्यन्तं दुःखभाजस्तान्दयावान्कुरुते कथम् ॥५३॥
तस्माद्यस्मिन्मते प्रोक्तमेवमीशविचेष्टितम् ।
ईशनिन्दाकरं साक्षाच्छ्रद्धेयं ननु तत्कथम् ॥५४॥

ननूत्पन्नस्य बालस्य पित्राद्या दोषिणो यतः ।
ततोऽसावपि तज्जन्मा दुष्टत्वाद्दण्डमर्हति ॥५५॥
इत्यसत्—
यद्यागसोऽन्यदीयस्य दण्डमन्यत्र पातयेत् ।
पुरुषेऽनपराधेऽपि कथं स्यान्न्यायवान्प्रभुः ॥५६॥
पितुर्दुर्बुद्धिता पुत्रे न प्रसर्पति जातुचित् ।
पैत्रो हि शुक्रसंबन्धाच्छिशोर्देहो न चास्य धीः ॥५७॥
तथा हि दृश्यते लोकेऽप्यन्तरं तातपुत्रयोः ।
सुदुर्मतेरपि सुतो दृष्टः साधुशिरोमणिः ॥५८॥
ईशदत्तैव धिषणा दुष्टां दद्याच्च तां कथम् ।
दत्वा च तां दण्डयेच्चेदेष न्यायी कथं भवेत् ॥५९॥
ईशाज्ञोच्छेदरूपश्च योऽपराधः परात्मनः ।
स एव दोष इत्युक्तो जातमात्रे त्वसौ कुतः ॥६०॥
को हि तस्यापराधोऽसौ यद् दुष्टादजनिष्ट सः ।
जन्म खल्वीश्वराधीनं नाधीनं पुरुषस्य तत् ॥६१॥
यदि नामेश्वरो दत्वा दुष्टादस्मै बलाज्जनिम् ।
तत्कृते दण्डयेदेनं कथं स्यान्नीतिकृत्तमः ॥६२॥
किं च स्रष्टे विश्वसन्तः शुध्यन्तीति भवन्मतम् ।
तथाविधानां भवतां शिशूनां दुःखिता कुतः ॥६३॥
आस्तां चोत्पन्नमात्राणां शिशूनां वृत्तवर्णनम् ।
महतामपि दुःखादितारतम्यमहेतुकम् ॥६४॥

कांश्चित्सुसुखिनः कुर्वन् कांश्चिदत्यन्तदुःखिनः।
भवेद्वैषम्यनैर्घृण्यदोषयुक्तः परेश्वरः ॥६५॥
अथापि वर्तमानेन तैः स्याद्देहेन यत्कृतम्।
पापं तस्यैव च फलं दुःखमेतद्वचस्त्वसत् ॥६६॥
जन्मतोऽप्या मृतेर्ये ये नराः पापानि कुर्वते।
दुःखिनस्ते न दृश्यन्ते विपरीतं हि लक्ष्यते ॥६७॥
किं च खृष्टे विश्वसन्तः शुध्यन्तीति भवन्मतम्।
तथाविधा अपि नराः कुतो दुःखानि भुञ्जते ॥६८॥
यदि खृष्टे विश्वसन्तोऽपीह स्युर्दुःखभाजनम्।
अमुत्रापि न दण्ड्याः स्युरिति निश्चिनुमः कथम् ॥६९॥
नृस्वभावपरीक्षार्थं सुखदुःखादिभिः प्रभुः।
तान्संयोजयतीत्येतद्वचो जातु न युज्यते ॥७०॥
पररूपानभिज्ञैर्हि तज्ज्ञानार्थं परीक्ष्यते।
सर्वज्ञस्य दयासिन्धोः किं हि कार्यं परीक्षया ॥७१॥
दयावानल्पहेतोश्च न यच्छेद् दुःखमीश्वरः।
असह्यं खलु तन्नृणां तच्च जानन्ति तद्विदः ॥७२॥
स्वभावाद्ये यथा कुर्युर्लभेरंस्ते तथा फलम्।
तेभ्यो दुःखं बलाद्दत्वा निरर्थं तत्परीक्षणम् ॥७३॥
अस्मै लघीयसेऽर्थाय घोरं दुःखं वृथार्पयन्।
कथं दयावानीशः स्यात्किं च क्षेमं विधास्यति ॥७४॥

ज्ञानावस्थासदुःखानां युज्येतापि परीक्षणम् ।
बाल्यानुभूतदुःखानां हा कष्टं व्यर्थदुःखिता ॥७५॥
अन्ये बाल्यासदुःखाश्च प्रमीयन्ते तदैव ये ।
का तद्गतिर्यदि स्वर्गो हा तदुत्पादनं वृथा ॥७६॥
अलमेतावतैवास्तु किं विचारेण भूयसा ।
सम्यग्विचारिते भाति मुग्धोक्तिवदिदं मतम् ॥७७॥
अथ पूर्वभवोपात्तपापस्याप्रतिभानतः ।
न दण्डो युज्यत इति न विचारभवं वचः ॥७८॥
संप्रति क्रियमाणानां पापानां भावि दण्डनम् ।
नाधुना ज्ञायते तस्मात्तत्सत्त्वं स्वीकृतं न किम् ॥७९॥
न खल्वामुष्मिको दण्डो दृष्टः केनापि कुत्रचित् ।
किं तु शास्त्रैकनिर्णेयः शास्त्रादेषोऽपि बुध्यते ॥८०॥
पूर्वजन्मकृतैनांसि बोधयन् शास्त्रवाक्यतः ।
दण्डयन्नीश्वरो लोकान् कथं दोषेण लिप्यते ॥८१॥
पुनर्जन्मान्तरं नो चेन्मूकाद्यनधिकारिणाम् ।
कार्या स्यान्निरयैकाशा सृष्टिश्चैषां निरर्थिका ॥८२॥
तस्मान्मूकादिभावं ते प्राप्ताः प्रागर्जितांहसा ।
भूयो भवान्तरे तेभ्यो दद्यादेव सुखं विभुः ॥८३॥
अल्पाधिकापराधानां न न्याय्यं शासनं समम् ।
तस्मादवाप्तदण्डानां पुनर्जन्म स्वतः स्थितम् ॥८४॥

---

१ अत्र अ पुस्तकस्था टिप्पणी—"किं च पुनर्जन्माभावे साम्परायिकदण्डस्यापि वैयर्थ्यमेवेति वक्ष्यत एव ।" इति

निश्चितं भवतां शास्त्रं पुरुषैः स्वधिया कृतम् ।
नृबुद्ध्यनवगाह्यत्वाद्यत्र नोक्तं भवान्तरम् ॥८५॥
अथाकस्मात्सृजञ्जीवान् किं शुद्धान्सृजतीश्वरः ।
आहो दुष्टधियस्त्वाद्ये शुद्धानां दुष्टता कथम्[1] ॥८६॥
यदि वै दुष्टतामीयुः शुद्धान्तःकरणा अपि ।
हता व्यवस्था सकला दुष्टाः स्युः स्वर्गता अपि ॥८७॥
दोषयुक्तां यदि पुनर्नृबुद्धिं बुद्धिपूर्वकम् ।
सृजतीश इति ब्रूते तन्मतं दूरतस्त्यजेत् ॥८८॥
किं च भूतेन केनापि नरान्पापे प्रवर्तितान् ।
दीनान्परवशांश्चापि विभुर्दण्डयतीति ये ॥८९॥
वदन्ति तेऽविचारित्वमावहन्ति परात्मनि ।
कथं स्वहितकामानां तन्मतं स्याद्धितप्रदम् ॥९०॥
अथ तेन नरः पापाच्चरणे प्रेरितोऽपि सन् ।
विचारेण निवर्तेत पापादिति वचो भ्रमात् ॥९१॥
नासौ प्रेरयतेऽक्ष्यादीन्स हि प्रेरयते मनः ।
विचारश्च मनोधर्मो दुष्टे चित्ते कथं भवेत् ॥९२॥
यदौषधं रोगहरं तदेव विषदूषितम् ।
न गुणाय भवेत्तद्वद्विचारे दूषितं मनः ॥९३॥
ननु युष्मन्मतेऽप्येवं पूर्वजन्मक्रियावशात् ।
पापं प्रकुर्वतो जीवान्कथं दण्डयतीश्वरः ॥९४॥

---

१ अत आरभ्य ग्रन्थभागः आ पुस्तकेऽपि विद्यते.

उच्यते—
प्राग्भवेऽपि कृतं कर्म तेनैव तु यतः कृतम् ।
तस्मात्तद्वशतोऽप्यागन्कर्ता शासनमर्हति ॥९५॥
यथा क्रीडापरो बालो निमील्य स्वदृशौ चलन् ।
अवशोऽपि पतन्गर्ते पित्रा ताड्यत एव हि ॥९६॥
किं च स्वर्गाभिधे लोके दिव्यभोगयुते स्थितिः ।
मुक्तिरुक्तेति सिद्धान्तो नान्तःशान्तिकरः सताम् ॥९७॥
भुञ्जतां हि सुखं पुंसां बहुकालं ततः परम् ।
कालेन जायते त्रास उत्सुकस्यापि तत्सुखे ॥९८॥
किं त्वत्रत्यसुखभ्यासो स्वल्पकालेन जायते ।
कालेन बहुना तद्वद्दिव्यानामपि तर्क्यते ॥९९॥
किं चास्मिन्नपि लोके प्राक् पवित्रे पातकोज्झिते ।
उत्पादिते च विभुना पापावेशमनिच्छता ॥१००॥
कालेन प्राविशत्पापं स्वर्गे तन्न विशेत्कुतः ।
ततश्च दुःखभाजः स्युः कुतो न स्वर्गता अपि ॥१०१॥
ईशेच्छा तूभयत्रापि तुल्यैव क्षेमभावने ।
नृणां पापसमाचारं न चेहापि स इच्छति ॥१०२॥
तस्माद्दिव्यपदार्थानां भोगो मोक्ष इदं वचः ।
बालिशानां विमोहाय तदसत्परमार्थतः ॥१०३॥
किं तु देहाद्यहङ्कारात्सुखादेर्जायते स्पृहा ।
तत इष्टानिष्टयोगवियोगार्थं प्रवर्तते ॥१०४॥

साहङ्कारप्रवृत्तेश्च धर्माधर्माभिसंभवः ।
ततश्च सुखदुःखादि चक्रवत्परिवर्तते ॥१०५॥
एवं हि भ्रमतां पुंसां नानादुःखानि भुञ्जताम् ।
केषाञ्चित्कर्मणां योगाच्छुक्लो धर्मः प्रजायते ॥१०६॥
ततो भवति वैराग्यं विचारः प्रशमस्तथा ।
ततश्च ज्ञायते रूपं देहादेरात्मनोऽपि च ॥१०७॥
तस्यार्थान्निरहङ्काराः प्रवर्तन्ते ततः क्रियाः ।
ततश्च धर्माधर्माणामुदयो नैव जायते ॥१०८॥
स वै पुमान्विशुद्धात्मा कर्मशेषस्य संक्षये ।
विमुक्तः सुखदुःखाभ्यां स्वस्वरूपेण[1] तिष्ठति ॥१०९॥
तं मोक्षं सुविचारेण मन्यन्ते शुद्धबुद्धयः ।
विषयाणां तूपभोगात्कुतः स्यात्सुचिरं सुखम् ॥११०॥
अभिमानोद्भवं दुःखं सर्वेषामानुभाविकम् ।
तन्निरासात्तन्निरास इत्येतदपि निश्चितम् ॥१११॥
बह्व्यः सन्ति स्त्रियो लोके न तन्नाशेन खिद्यति ।
स्वत्वेनाभिमता या तु तन्नाशाद् दुःखमश्नुते ॥११२॥
सन्त्यनेकानि गेहानि न तन्नाशेन खिद्यति ।
स्वत्वेनाभिमतं यत्तु तन्नाशाद् दुःखमश्नुते ॥११३॥
अभिमानोद्भवं दुःखं[2] तस्मात्सर्वत्र निश्चितम् ।
तन्निरासात्तन्निरासो यथैतदपि कथ्यते ॥११४॥

---

१ 'स्वस्वरूपेण'—इ. २ आ पुस्तकेऽत ऊर्ध्वं त्रीणि पत्राणि नष्टानि

स्वत्वेनाभिमतं वस्तु यदान्यस्मै प्रदीयते ।
ममताया निवृत्तत्वान्न तन्नाशेन खिद्यति ॥११५॥
तथात्मभावं देहादावध्यस्यात्मनि देहनाम ।
अविवेकाच्चिदचितोर्ग्रन्थिमाहुर्मिति मन्यते ॥११६॥
ततो देहाभिमानेन युक्तं दुःखित्वमात्मनः ।
तन्निरासान्निरासश्च दुःखस्यातीव युज्यते ॥११७॥
क्व चात्मा चित्स्वभावोऽयं क्व देहादि जडं तयोः ।
वैलक्षण्यं महदिति विवेकादीक्षते यदा ॥११८॥
तदैव सर्वदुःखानि त्यक्त्वानन्दं समश्नुते ।
इति तावदतिस्पष्टं संशयो नेह कश्चन ॥११९॥
विरक्तिर्विषयेभ्यश्च मुक्तेः परमसाधनम् ।
वैराग्येण ह्यभिमतेर्निवृत्तिर्जायते क्रमात् ॥१२०॥
विषयांस्तत्र रागं च विभुर्नृषु ततो न्यधात् ।
तस्माद्युक्तं न वैराग्यमिति वागविचारजा ॥१२१॥
सर्वासु स्त्रीषु नृषु च रतिकामुकता स्थिता ।
मत्वा तामीश्वरप्रत्तां किं भाव्यं पारदारिकैः ॥१२२॥
नास्मान्विहन्तुं विषयैः प्रलोभ्य परमेश्वरः ।
बडिशेनेव यादांसि क्वचित्कामयते विभुः ॥१२३॥
सुरां काममयीं पीत्वा न विवेकाच्च्यवेत कः ।
कश्च कामांश्चिरं भुक्त्वा तृप्तः स्यामित्यवस्यति ॥१२४॥

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥१२५॥
तस्मान्मूलमनर्थस्य रागो विषयगो नृभिः ।
सर्वानर्थनिवृत्त्यर्थं निरोद्धव्यः प्रयत्नतः ॥१२६॥
तस्माद्दिव्यपदार्थानां भोगो मोक्ष इदं वचः ।
बालिशानां विमोहाय तुच्छं तत्त्वविदां पुरः ॥१२७॥
अहो कृतं भवच्छास्त्रे यथेशगुणवर्णनम् ।
निन्दैव केवलं भाति जायते विस्मयश्च नः ॥१२८॥
उत्पाद्य सुबहूञ्जीवांस्तेष्वल्पानेव मोचयन् ।
अन्यांस्त्यक्तभवच्छास्त्रान्नरके क्षिपतीश्वरः ॥१२९॥
कालं तेऽवधिशून्यं च नरके दुःखभोगिनः ।
पुनर्नोद्धरणं तेषां निरयादस्ति कर्हिचित् ॥१३०॥
ये तावदीशसृष्टेषु स्वर्गतांस्तज्जनुर्वरम् ।
ये पुनर्नरकावासास्तेषां सृष्टिर्निरर्थिका ॥१३१॥
तेषां सर्जनकाले किं नासीज्ज्ञानं परात्मनः ।
कृत्वा पापान्यमी दुःखं भोक्ष्यन्ति नरकेष्विति ॥१३२॥
जानन्नवश्यभोक्तव्यं तैर्दुःखं यदि चेश्वरः ।
असृजद् दुःखभोगार्थं कस्तस्माद्व्यसनी परः ॥१३३॥
तेषां प्रयोजनाभावात्कृच्छ्रबाहुल्यदर्शनात् ।
अहो निरर्थिका सृष्टिः पामरा अप्यदो विदुः ॥१३४॥

कथं नु दुःखभाजः स्युः सृज्यैरन्नैव ते यदि ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥१३५॥
दुःखं हि दातुं योऽस्मभ्यमसतोऽप्युदपादयत् ।
कृतायामपि सेवायां स कथं नाम मोचयेत ॥१३६॥
नूनं खाष्टैः स्वबुद्ध्यैव तर्कं कुर्वद्भिरीश्वरे ।
घटस्येव कुलालादिर्जगत्कर्तापि कल्पितः ॥१३७॥
किं तु न व्यसनित्वाद्यान्विदुर्दोषान्समागतान् ।
बालिशोक्तीश्च मन्यन्ते श्रद्धया केवलं सतीः ॥१३८॥
अस्मन्मते तु ये तावद्बहुपापकृतो नराः ।
भुक्त्वा पापफलं भूरि ते दुःखं नरकादिषु ॥१३९॥
भूयो भवान्तरे पुण्यैः सुखान्यपि च भुञ्जते ।
न तु कालं निरवधिं केवलं दुःखभोगिनः ॥१४०॥
एवं भवेष्वनेकेषु भुञ्जन्तस्ते सुखासुखे ।
शुक्लधर्मोद्भवाज्ज्ञानात्क्रमान्मुक्तिं प्रयान्त्यपि ॥१४१॥
यदिदं भगवत्कृत्यमस्मदीये मते स्थितम ।
सदयत्वं भगवत आवेदयति पुष्कलम् ॥१४२॥
किमीशो नृहितार्थाय दण्डं पापस्य यच्छति ।
उताहो शत्रुभावेन भवतैतदिहोच्यताम् ॥१४३॥
तत्र तु प्रथमः पक्षो न सिध्यति भवन्मते ।
सदा नरकवासानां कदा नु भविता हितम ॥१४४॥

युक्तं तु परमेशस्य यथा पुत्रं निजं पिता ।
हन्ति दोषनिवृत्त्यर्थं ददाति च सुखं ततः ॥१४५॥
तथैव जीवशिक्षार्थं दण्डं दत्वा ततः सुखम् ।
क्रमेण मोक्षणं चापि यद्यसौ हितमिच्छति ॥१४६॥
यदि पापकृतां दण्डनिवृत्तिर्न कदाचन ।
निरर्थस्तर्हि तद्दण्डो लुप्ता चास्य दयालुता ॥१४७॥
अपराधः प्रभोर्येन यावान्खलु भवेत्कृतः ।
तावानेवास्य दण्डोऽपि शास्यते न्यायकोविदैः ॥१४८॥
अल्पाधिकागसां नॄणामनन्ता नरके स्थितिः ।
भवतीति गिरा देवः किमन्यायी न कल्पितः ॥१४९॥
एवं मनुष्यभिन्नानां गतिः काचन नेष्यते ।
इति ब्रुवद्भिर्मर्त्यानां गतिर्वाङ्गीकृता कुतः ॥१५०॥
पश्वादेर्मरणादूर्ध्वं यदि नो गतिरिष्यते ।
मनुष्याणामपि तदा केन दृष्टा गतिर्वद ॥१५१॥
क्षुत्तृष्मैथुननिद्रादि पशूनां मनुजैः समम् ।
स्वहितस्य तथा लिप्सा जिहासा स्वाहितस्य च ॥१५२॥
पक्ष्यादीनां गृहादीनि स्वकुटुम्बस्य पोषणम् ।
वर्षातपादिविज्ञानं तदुपायादिचिन्तनम् ॥१५३॥
भयं चैव भयस्थानं सुखस्थानं सुखं तथा ।
ऋते शास्त्रीयविज्ञानं जानन्ति पशवोऽखिलम् ॥१५४॥

अथास्ति चेन्मनुष्याणां मृतेरूर्ध्वमपि स्थितिः[1]।
पशूनामपि तर्ह्यस्तु तेऽपीशस्यैव जन्तवः ॥१५५॥
यथैव सुखभोगेच्छायोग्यता चास्ति मानवे।
पशूनामपि तुल्या तान् सृष्ट्वा दद्यान्न किं सुखम् ॥१५६॥
नन्वीश्वरीयविज्ञानं पशुभ्यो मनुजेऽधिकम।
इति चेत्तावतेशस्य को विशेषः प्रजायते ॥१५७॥
दयालुराप्तकामश्च तुल्यदृष्टिरपीश्वरः।
स्वसृष्टेभ्यः सुखं दातुं स्वज्ञानं किमपेक्षते ॥१५८॥
नूनं व्यवस्थया नृणां प्रवृत्त्यर्थं स्वया धिया।
खैर्दृष्टैः[2] प्रकल्पितः स्वर्गो नरकश्च तथेश्वरः ॥१५९॥
पशोः प्रयोजनाभावान्न गतिर्लिखिता क्वचित्।
न तु शास्त्रं प्रमाणं तदित्यस्माज्जायते मतिः ॥१६०॥
हन्तेशेनेच्छया सृष्टा यद्येते पशवो नृभिः।
नियोजिताः स्वयानादौ क्षतस्कन्धाः क्षुधातुराः ॥१६१॥
तृषार्ता ऊष्मणा तप्ताः क्वचिच्छीतार्दिता अपि।
भुञ्जते केवलं दुःखं कष्टं तर्हीशचेष्टितम् ॥१६२॥
वयं तु प्राग्भवांहोभिः पशुतां यान्ति जन्तवः।
भुक्त्वा कर्मफलं तस्मान्मुच्यन्त इति मन्महे ॥१६३॥

---

१ अत आरभ्य ग्रन्थभागः आ पुस्तकेऽपि वर्तते.

२ 'तत्र'–आ. इ पुस्तकेऽपि 'तत्र' इति पाठः प्रागासीद्यः पश्चात्संशोध्य 'खाष्टैः' इति अ पुस्तकवद्विहितो दृश्यते.

भवता किल वक्तव्यं यद् दुःखं पशुषु स्थितम् ।
तत्कस्य हेतोरीशोऽपि दुःखार्थं किमसृष्ट तान् ॥१६४॥
अहो बताम्मदादीनामपि तद्दुःखदर्शने ।
कृपया द्रवते चित्तं दयालोरपि किं न हि ॥१६५॥
किं च व्याघ्रोरगमुखान्विश्वोपप्लवकारिणः ।
अकस्मात्स्वेच्छया कुर्वन्भगवान् व्यसनी भवेत् ॥१६६॥
एवं नृणां विशुद्ध्यर्थं खृष्टो दण्डं गृहीतवान् ।
इत्येतदपि युष्माकं न मन्ये साधु भाषितम् ॥१६७॥
अन्यस्य दण्डग्रहणादन्य एव च शुध्यति ।
इति न्यायपथापेतं न ह्येतन्न्यायरक्षणम् ॥१६८॥
अपराधं तु यः कुर्यात्स एवार्हेति शासनम् ।
न्यायरूपमिदं प्राहुरन्यस्त्वन्याय ईरितः ॥१६९॥
अथ न्यायमतिक्रम्य यदि खृष्टः कृपावशात् ।
नन् शुद्धान्कुरुते तर्हि तस्य दण्डग्रहो वृथा ॥१७०॥
[1]किं च विश्वासमात्रेण खृष्टे चेत्स्यादघक्षयः ।
तदांहोरतयः कामं कुर्युः पापानि मानवः ॥१७१॥
पापवर्जनसंयुक्तो विश्वासश्चेदपेक्ष्यते ।
तदसाध्यं यतः कोऽपि नरो नास्त्यघवर्जितः ॥१७२॥
अथानुतापसहितो विश्वासोऽपेक्ष्यते यदि ।
अलं तर्ह्यनुतापेन किं विश्वासप्रयोजनम् ॥१७३॥

---

१ आ पुस्तके एतदादि श्लोकषट्कं पश्चिमशोधरूपेण विहितं दृश्यते.

ईशोऽनुतापमात्रेण दयावत्त्वादघक्षमाम् ।
कुर्यादेव हि किं खृष्टविश्वासादेः प्रयोजनम् ॥१७४॥
किं च बाल्ये मृताः खृष्टप्रायश्चित्तप्रभावतः ।
मुच्यन्तेऽविश्वसन्तोऽपि तथान्येऽपि नरा न किम् ॥१७५॥
सम्यग्विचार्यमाणं चेद्भवतामीदृशं मतम् ।
सुधियां पुरतो भाति सर्वं मुग्धोदितार्थकम् ॥१७६॥
मैषा खल्विह दोषाणां दिगेव परिदर्शिता ।
विचारे तु कृते नैकमपि दोषोज्झितं पदम् ॥१७७॥

इति शास्त्रतत्त्वविनिर्णये परमतदूषणनिरूपणं नाम द्वितीयोऽध्यायः ॥२॥[1]

---

१ अत उत्तरं 'श्रीरामाय नमः' इति अ पुस्तके.

तृतीयोऽध्यायः

गम्भीरमैश्वरं शास्त्रं नृतर्कागोचरार्थवत् ।
तत्र दोषं न संपश्येत् क्षुद्रा हि नरबुद्धयः ॥ १ ॥
पुराणादिषु या वार्त्ता ये च धर्माः सनातनाः ।
अतर्क्याः खलु तेऽस्माकं न तांस्तर्केण योजयेत् ॥ २ ॥
किमाशयवतेशेन क उपायाः प्रकल्पिता ।
अस्माकमिच्छता श्रेयस्तज्ज्ञातुं नेश्वरा वयम् ॥ ३ ॥
भवन्मतेऽपि दृश्यन्ते नृतर्कागोचराः कथाः ।
यथाद्यनार्या संवाद उरगस्येति कथ्यते ॥ ४ ॥
एवमन्याश्च दृश्यन्ते कथाः संभावनोज्झिताः ।
वंशावल्यादिकथने विरोधोऽपि च दृश्यते ॥ ५ ॥
[1]कचिद्विरुद्धा विद्यायाः सूर्ये गतिरुदीर्यते ।
ततोऽपि मतकर्तॄणामज्ञत्वमिव भासते ॥ ६ ॥
या अस्माकं पुराणादौ कथाः सन्ति तथाविधाः ।
भवद्भिस्तास्तु दूष्यन्ते कष्टमज्ञानवैभवम् ॥ ७ ॥

---

१ अत्र अ पुस्तकस्था टिप्पणी— "कश्चिदद्भुतमाहात्म्यः सूर्यमाह तिष्ठत्विति, तदा कियन्तं कालं सूर्यो न चचालेत्युक्तम्, तत्कथामवघटते । किं हि स्थाणोः स्थितिविधानम् ?" इति.

वस्तुतः सूक्ष्मया बुद्ध्या बुद्धिमद्भिर्विचारिते ।
सर्वेषामैशशास्त्राणां रीतिरेकैव दृश्यते ॥ ८ ॥
ईशभक्त्येकवर्धिन्यो नृतर्कागोचराः कथाः ।
श्रद्धैकचक्षुःसंप्रेक्ष्याः प्रायेणैशत्वलक्षणम् ॥ ९ ॥
किं त्वस्ति भवतां शास्त्रमल्पमल्पकथं यतः ।
अल्पानि शङ्कास्थानानि लक्ष्यन्ते तत्र वै ततः ॥ १० ॥
अस्माकं तु पुनः शास्त्रं वर्तते बहुविस्तृति ।
सर्वस्यानुगमस्तस्माद् दुःशकोऽल्पधियां नृणाम् ॥ ११ ॥
सर्वेषामपि तात्पर्यमीशभक्तिविवर्धने ।
इति तत्त्वविदः प्राहुर्मूढानां तु भ्रमो वृथा[1] ॥ १२ ॥
संदिश्य शिवमध्वानं भवद्देश्यान्समुद्धरन् ।
किमस्मान्सकलानीश उपेक्षेतैव केवलम् ॥ १३ ॥
खृष्टं हि कश्चिदज्ञात्वा न मुच्येतेति चेद्भवेत् ।
तदास्मद्देशजाः सृष्टाः खृष्टाज्ञा नरकाय किम् ॥ १४ ॥

---

१ **आ** पुस्तके अत उत्तरमतिरिक्तः श्लोकः "इदं च मे वचः पथ्यं श्रूयता यदि रोचते । श्रद्धया चाग्रहं त्यक्त्वास्य मतस्योत्सृज्य दूरतः ॥" इति **इ** पुस्तकेऽयमतिरिक्तः श्लोकः प्राग्लिखितोऽपि पश्चान्निरस्तो दृश्यते. एतदादि श्लोकचतुष्टयम् **आ** पुस्तके पश्चिमशोधरूपेण लिखितं दृश्यते.

२ एतदादि श्लोकद्वयम् **इ** पुस्तके पश्चिमशोधरूपेण विहितं दृश्यते. अस्य श्लोकद्वयस्य स्थाने **आ** पुस्तके "ज्ञात्वा खृष्टं भवद्देश्याः केवलं स्वर्गभागिनः । अन्ये तदज्ञा ईशेन किं भोक्तुं नरकं कृताः ॥" इति श्लोको यः **इ** पुस्तके प्राग्लिखितोऽपि पश्चान्निरस्तो दृश्यते

[1]तद्धि नूत्नप्रसिद्धित्वादस्मद्देश्यैर्भवन्मतम् ।
ज्ञातमाधुनिकैः स्वल्पैः प्राग्भवैः सुतरां न च ॥ १५ ॥
तुल्यैव खलु सर्वेषां श्रेय आशीर्नृणां प्रभोः ।
तस्मात्स्वं स्वं मतं सर्वेऽप्यर्हामः समुपासितुम् ॥ १६ ॥
युष्माभिः स्वीयशास्त्रेषु कामं श्रद्धा विधीयताम् ।
न पुनर्दूष्यतां शास्त्रमस्माकं स्वल्पया धिया ॥ १७ ॥
भिन्नाधिकारयुक्तानां भिन्नान्दर्शयतोऽध्वनः ।
सुगम्भीरस्य शास्त्रस्य तत्त्वज्ञस्त्वीश एव हि ॥ १८ ॥
स्वाभाविकभ्रमवती क्व बुद्धिः पौरुषी बत ।
क्व चैशमाकूतमिति विचारयत चेतसि ॥ १९ ॥
पश्यन् शङ्खं पुमान् कश्चित्पित्तदूषितलोचनः ।
पीत एवेति जानाति वस्तुतः शुक्ल एव सः ॥ २० ॥
तथाल्पजडबुद्धीनां दुष्ट एवेति निश्चयः ।
भवेद्यद्यपि शास्त्रार्थे वस्तुतः शुद्ध एव सः ॥ २१ ॥
तात्पर्यं लोकवाक्यानामपि न ज्ञायते यया ।
तयेशवाक्यनिन्देति साहसं त्यज्यतामिदम् ॥ २२ ॥
अहो ते कुशला बुद्धिरहो सम्यगनुष्ठितम् ।
इति यत्क्रोधजं वाक्यं वदन्त्यागस्कृतं प्रति ॥ २३ ॥
शब्दमात्रानुसंधाने तद्धाति स्तुतिवाक्यवत् ।
यस्तु तात्पर्यविज्ञाता स कुत्सां निश्चिनोति ताम् ॥ २४ ॥

---

१ अयं श्लोकः आ पुस्तके नास्ति.

ततस्तात्पर्यविज्ञानं सर्वत्रापेक्ष्यते खलु ।
ज्ञायते किं तु लोकानां प्रसङ्गेनेङ्गितादिना ॥ २५ ॥
ईश्वरस्य तु तात्पर्यं कथं वा ज्ञायतां नृभिः ।
तस्मान्न दूष्यतां शास्त्रं बुद्धेरल्पत्वमूह्यताम ॥ २६ ॥
तात्पर्यज्ञानशून्यानां यो ह्यर्थो भाति शब्दतः ।
ज्ञायमाने तु तात्पर्ये सोऽन्यथैवावभासते ॥ २७ ॥
नन्वेवं गूढतात्पर्यं नेश्वरः प्रणयेन्मतम् ।
तद्धि सर्वोपकारार्थमिति चेन्मैवमुच्यताम् ॥ २८ ॥
यदुक्तमतिगम्भीरं दोषदृष्टिसमीक्षितम ।
तदेव श्रद्धया दृष्टं नितरां सुग्रहं यतः ॥ २९ ॥
तथा हि शास्त्रमार्गेषु श्रद्दधानास्तु ये रताः ।
तेऽर्थं सुखेन गृह्णन्तः परं प्रेम भजन्ति च ॥ ३० ॥
तर्कदृष्ट्या तु ये दोषांस्तत्र पश्यन्ति बालिशाः ।
ईशाशयः कथं ज्ञात इति तान्प्रति नो वचः ॥ ३१ ॥
दुर्बोधं रूपमीशस्य तन्नीतिरपि दुर्ग्रहा ।
तद्बोधकस्य शास्त्रस्य गाम्भीर्यमपि युज्यते ॥ ३२ ॥
लौकिकैरपि भूपालैः कल्प्यते या प्रजावने ।
नीतिस्तत्स्था अपि जनैर्ज्ञायन्ते नैव हेतवः ॥ ३३ ॥
कथं पुनर्भगवतो नानाहेतुमयी परा ।
नीतिर्भवेन्न गम्भीरा यत्र मुह्यन्ति सूरयः ॥ ३४ ॥

नृणामत्यल्पबुद्धित्वात्सूक्ष्मगम्भीरवस्तुनि ।
भवन्ति संशयाः पुंसां तद्धि तस्यास्ति भूषणम् ॥ ३५ ॥
प्रसिद्धं सहसा बुद्धेः सूक्ष्मार्थानवबोधनम् ।
तया ज्ञायेत चेत्तत्त्वं गाम्भीर्यं नाम किं ततः ॥ ३६ ॥
प्रत्युतापि च यच्छास्त्रं सहसा गृह्यते धिया ।
न तदैश्वरतत्त्वेन युक्तमस्तीति तर्क्यते ॥ ३७ ॥
नूनं भवन्मतं सर्वं बालधीगोचरार्थकम् ।
नरैरिव कृतं भाति प्रकल्प्येव स्वया धिया ॥ ३८ ॥
मोक्षो विषयभोगात्मा गत्यभावस्तथा पशोः ।
अनेकजन्माकथनं दृष्टैकभवसंमतिः ॥ ३९ ॥
चित्तदूषकदृताद्या येऽर्थाश्चान्ये भवन्मते ।
संमोहनाय बालानां कल्पिता इव भान्ति ते ॥ ४० ॥
तथा स्वमतविश्वासमात्रेणाघौघमोचनम् ।
इत्यपि स्वमतेऽन्येषां प्रवेशायेव कल्पितम् ॥ ४१ ॥
मूर्त्यर्चाप्रतिषेधादि नामकीर्तनवर्जनम् ।
तच्च प्राचीनसिद्धान्तद्वेषमूलमिवेक्ष्यते ॥ ४२ ॥
न लोष्ठकाष्ठबुद्ध्या हि पूज्यन्ते मूर्तयः क्वचित् ।
व्यापकेश्वरबुद्ध्यैव को दोषस्तत्र भण्यताम् ॥ ४३ ॥
व्यापको हि स्मृतो देवो निर्लेपश्च वियद्यथा ।
तद्बुद्ध्या पूज्यते यत्र तत्र स्वीकुरुतेऽर्चनम् ॥ ४४ ॥

किं त्वाज्ञा तस्य यत्रास्ति तत्रैवासौ समर्च्यते ।
यतः शास्त्रं प्रमाणं नः कार्याकार्यव्यवस्थितौ ॥ ४५ ॥
तथैव भगवन्नामकीर्तनेन निरन्तरम् ।
ईशे मुहुर्मुहुश्चेतो याति तत्रापि का क्षतिः ॥ ४६ ॥
अथ स्वपितरं पुत्रः पितः पितरिति ब्रुवन् ।
खेदं करोति वै तद्वदीशनाम्नेत्यसद्वचः ॥ ४७ ॥
येन केन प्रकारेण स्वस्मिंश्चित्तप्रवेशनात् ।
प्रसीदति जगन्नाथो न तु खिद्यति लोकवत् ॥ ४८ ॥
लोकतुल्यस्वभावश्चेद् भगवानपि कल्पितः ।
सर्वकालमकार्या स्यात्तत्स्तुतिश्च भवन्मता ॥ ४९ ॥
प्राकृताः खलु खिद्यन्ति हृद्विक्षेपादिकारणात् ।
हन्तानन्तमहिम्नस्तु हीयते किं तदुक्तिभिः ॥ ५० ॥
विश्वोत्पत्त्यादिविषये ये ये चार्था भवन्मते ।
सर्वे ते बालधीगम्या बालधीकल्पिता अपि ॥ ५१ ॥
तथा हि व्यसनित्वाद्या दोषाः प्राक्प्रतिपादिताः ।
बहवस्तत्र दृश्यन्ते तद्धि बालिशधीकृतम् ॥ ५२ ॥
मूढैरपि यदीयार्था गृह्यन्ते सहसा धिया ।
न तदैश्वरतत्त्वेन युक्तं नाप्यैश्वरं मतम् ॥ ५३ ॥
अथवा परमेशेन देशेऽस्मिन्ब्राह्मणान्विते ।
पवित्रे सकलो नूनं स्वाभिप्रायः स्फुटीकृतः ॥ ५४ ॥

अथो यावनदेशेषु भवदीयेषु चेश्वरः ।
कथञ्चिन्नृहितार्थाय स्वामुपासामुपादिशत् ॥ ५५ ॥
तथा हि भवतां शास्त्रं बालधीगोचरार्थकम् ।
तथैव यवनादीनामपि भाति समन्ततः ॥ ५६ ॥
अस्माकं त्वतिगम्भीरं वेदवाचा च दिव्यया ।
प्रोक्तं ब्रह्मध्वभिर्युक्तं गूढतत्त्वं च दृश्यते ॥ ५७ ॥
वेदानां भारतादेश्च शास्त्रस्य मानवस्य च ।
वाक्प्रागल्भ्यादनिर्वाच्याच्छ्रद्धातीव विवर्धते ॥ ५८ ॥
निरुक्तब्राह्मणादीनां सूत्रादीनां तथैव च ।
वाङ्माधुर्यादनिर्वाच्याद्भूयः श्रद्धा विवर्धते ॥ ५९ ॥
यथा यथा भवद्भिश्च प्रोच्यते तत्र दूषणम् ।
गाम्भीर्यनिश्चयद्वारा भूयः श्रद्धा विवर्धते ॥ ६० ॥
यथार्थं भगवद्रूपबोधकं दृढहेतुमत् ।
गम्भीरं च प्रसन्नं च शास्त्रमस्माकमेव हि ॥ ६१ ॥
किं त्वेतद्भवतां देशे न दृष्टं नापि वा श्रुतम् ।
स्वमते च कुलप्राप्ते केवलं जातनिश्चयैः ॥ ६२ ॥
भवद्भिरकृतश्रद्धैः सहसैवोपलक्षितम् ।
तस्मादसदिवाभातं न तु गर्हितुमर्हथ ॥ ६३ ॥
भाति ह्यश्रद्दधानानां सेश्वरं सकलं मृषा ।
तथा चानन्तरेऽध्याये स्फुटं तद्दर्शयिष्यते ॥ ६४ ॥

---

१ एतदादि श्लोकसप्तकम् आ पुस्तके पश्चिमशोधरूपेण लिखितं दृश्यते.

भवतां च दृढाश्रद्धाहेतोरेवोद्भवन्ति वै ।
अस्मच्छास्त्रस्य विषये नानाकारा विकल्पनाः ॥ ६५ ॥
वेदान्व्यरचयन्केचिज्जातिभेदः प्रकल्पितः ।
इत्याद्याः कल्पना ज्ञेया अश्रद्धैकभवा इति ॥ ६६ ॥
नास्तिक्यबुद्धिः पापिष्ठा सदर्थमपि मुञ्चति ।
श्रद्धा परमकल्याणी मातेवावति मानवान् ॥ ६७ ॥
तस्मान्न साहसं कार्यमैश्वरेऽर्थे सनातने ।
अश्रद्धाप्रभवस्तर्को ह्यनर्थायैव केवलम् ॥ ६८ ॥
अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् ।
नाप्रतिष्ठिततर्केण गम्भीरार्थस्य निश्चयः ॥ ६९ ॥
गम्भीरमैश्वरं शास्त्रं नृतर्कागोचरार्थवत् ।
तत्र दोषं न वै पश्येत्क्षुद्रा हि नरबुद्धयः ॥ ७० ॥
प्रतीतोऽप्यल्पया बुद्ध्या नेह दोषोऽस्ति वस्तुतः ।
तत्तत्तत्त्वपरिज्ञानात्सा सा शङ्का निवर्तते ॥ ७१ ॥

इति शास्त्रतत्त्वविनिर्णये हितोपदेशो नाम तृतीयोऽध्यायः ॥ ३ ॥

---

१ अत. पूर्वं 'श्रीः' इत्यधिकम् अ आ पुस्तकयोः.

चतुर्थोऽध्यायः

श्रद्धैव केवलं शास्त्रे प्रयोक्तव्या हितेच्छुभिः ।
न हि तर्कस्य निष्ठास्ति स बुद्धिमनुवर्तते ॥ १ ॥
शास्त्र एवेश्वरः प्रोक्तस्तथैव तदुपासनाः ।
यज्ञादीन्यथ कर्माणि तत्तथा न तदन्यथा ॥ २ ॥
इन्द्राद्या देवता याश्च गङ्गास्नानादिकं च यत् ।
अन्ये चोच्चावचा धर्माः सत्याः शास्त्रैकमानतः ॥ ३ ॥
तदाक्षिपथ तर्काच्चेत्सर्वं तर्केण लुप्यति ।
न प्रयोजनमीशस्य न स्वर्गो न च रौरवम् ॥ ४ ॥
तर्कगर्भप्रमत्तानां वचो हि बहुनिष्ठुरम् ।
उन्मूलयद्धर्मपथं कः खण्डयितुमीश्वरः ॥ ५ ॥
तथा हि—
स्त्रियः पुरुषसंयोगाज्जनयन्त्यखिलान्नरान् ।
बीजानि चैव सस्यादीन्संयोगान्मृज्जलोष्मणाम् ॥ ६ ॥
प्रासादादीन् शिल्पिजना एवं विश्वस्य कल्पना ।
किं प्रयोजनमीशस्य क्व स्वर्गः क्व च रौरवम् ॥ ७ ॥
प्रतिबन्धकसत्त्वाद्वा कारणासंनिधेरपि ।
कृतेऽपि यत्ने पुरुषैः फलं नोत्पद्यते क्वचित् ॥ ८ ॥

ननूत्पादयिताद्यस्य पुंसः कोऽन्यः परात्मनः ।
इति चेदीश्वरस्यापि कोऽस्ति कर्तेति भण्यताम् ॥ ९ ॥
यद्यनादिर्जगत्कर्ता न कर्ता तस्य कश्चन ।
आस्तामनादिनी तर्हि पुंसामेव परम्परा ॥ १० ॥
ननु कार्यं कर्त्रधीनमित्यस्य नियमस्य च ।
घटादौ दर्शनात्कर्ता वृष्ट्यादेरपि कल्प्यते ॥ ११ ॥
मैवम्—
न हि कार्यस्य हेतुत्वं पुरुषे मन्महे वयम् ।
किं तु संजायते कार्यं यावत्कारणसंगमे ॥ १२ ॥
स क्वचिच्चेतनाधीनः क्वचित्स्वाभाविकोऽपि च।
यथा घटादौ भ्रम्यादिश्चेतनेनैव साध्यते ॥ १३ ॥
प्रभञ्जनोप्तबीजादेस्तथैवोत्पद्यते फलम् ।
अन्वयव्यतिरेकाभ्यां हेतुता हेतुसंगमे ॥ १४ ॥
अत्राह—
अन्नमापश्च जन्तूनां सर्वेषामपि जीवनम् ।
नियमेन च तद् वृष्ट्या काले काले समेधते ॥ १५ ॥
पृथिवी षड्रसान्सूते पुष्यन्ते यैश्च जन्तवः ।
वनस्पतींश्च विविधान् रोगाणां व्याहृतिर्यतः ॥ १६ ॥
जायमानस्य च शिशोः पालनार्थं स्तनान्तरे।
उत्पद्यते पयो धात्र्या यावच्चास्य प्रयोजनम् ॥ १७ ॥

एवं व्यवस्था महती सृष्टौ या परिदृश्यते ।
अकस्मात्कुत आयाता तस्मात्कर्तास्ति निश्चितः ॥ १८ ॥

अत्रोच्यते—

एवं व्यवस्थितजगत्कर्तृताशक्तिरीश्वरे ।
केनार्पिता कुतः प्राप्ता कथमासादिता वद ॥ १९ ॥
एवमद्भुतसामर्थ्यं सर्वज्ञमपि चेश्वरम् ।
को वासृजदिति ब्रूहि व्यवस्थितजगत्कृतम् ॥ २० ॥
ज्ञानं सामर्थ्यमीशे च दृष्टे सृष्ट्युपयोगिनी ।
एवं व्यवस्थासंयुक्तमीशं कोऽसृजदुच्यताम् ॥ २१ ॥
स्वाभाविकी व्यवस्थेशे सोऽनादिरिति चेत्तदा ।
स्वाभाविकी व्यवस्थापि जगतः किं न कल्प्यते ॥ २२ ॥
तथा ह्यत्रोक्तया युक्त्या तुल्या युक्तिः प्रदर्शिता ।
विदुषा भास्करार्येण स्वसिद्धान्तशिरोमणौ ॥ २३ ॥
मूर्तौ धर्ता धरित्र्याश्चेत्तस्याप्यन्यस्ततोऽपरः ।
अनवस्थैवमन्त्ये चेत्स्वशक्तिः सादिमेऽस्त्विति ॥ २४ ॥
अकस्मात्खात्पतद्दृष्ट्वा जलं चकितचेतसः ।
अधीरा हेत्वविद्वांसः कश्चिदीशं प्रचक्षते ॥ २५ ॥
जगदत्यद्भुतं दृष्ट्वा यदि कर्तास्य कल्प्यते ।
ईशेऽप्यद्भुततोहेतोर्भवेत्कर्तृपरम्परा ॥ २६ ॥

---

१ आ पुस्तक एतदादि श्लोकद्वय पश्चिमशोधरूपेण लिखित दृश्यते.

किं च व्यवस्था जगतो यदि स्यादीशनिर्मिता।
नियमेनैव सा तिष्ठेदीशः प्रामाणिको यतः ॥ २७ ॥
महतां व्यवहारो हि नियतो भवति ध्रुवम् ।
क्षणमन्या क्षणादन्या त्वियं क्षुद्रहृदां कृतिः ॥ २८ ॥
ततो जनन्याः स्तन्यादि यदि चेदीशनिर्मितम्।
न म्रियेत शिशुः कोऽपि क्षुधा निःस्तन्यमातृकः ॥ २९ ॥
पुनरप्यखिलं विश्वं यदि स्यादीशकर्तृकम् ।
तदा वृष्ट्यन्नपानादि न कुर्याद्गौरवावहम् ॥ ३० ॥
स ह्यात्मनः प्रभावेन शक्नुयादवितुं नरान्[1] ।
न कुर्यादेव वा व्यर्थां पिपासां च क्षुधामपि ॥ ३१ ॥
तस्मात्स्वभावतः सन्ति विश्वस्मिन्नद्भुता गुणाः।
बुद्धिमद्भिः किं तु जनैस्तत्तदर्थेषु योजिताः ॥ ३२ ॥
धर्माधर्मौ केन दृष्टौ क्व स्वर्गनरकावपि ।
देहे पञ्चत्वमापन्ने किं तन्नामावशिष्यते ॥ ३३ ॥
नरैस्तुल्या अपि यथा पशवो मरणात्परम् ।
पृथिव्यादौ विलीयन्ते को विशेषो नरेष्वपि ॥ ३४ ॥
बहुदोषाणि दृश्यन्ते मतानि सकलान्यपि[2] ।
तानि नैशानि वै तस्मादविश्वास्यास्तदुक्तयः ॥ ३५ ॥
कस्माच्चेशो मतं कुर्यात् किं हि तस्य प्रयोजनम् ।
नृणां स मुक्तिमिच्छेच्चेत्किं न दद्यात्तथैव ताम् ॥ ३६ ॥

---

१ 'नरात्'—आ, इ.

२ एतदादि श्लोकसप्तकम् आ पुस्तके शोधरूपेण पश्चाल्लिखित दृश्यते.

यदि[1] चैकं मतं कुर्यात्तद्विरुद्धान्यसौ तदा ।
बलात्प्रलोपयेदेव यदीच्छति नृणां शिवम् ॥ ३७ ॥
पुरुषा भिन्नदेशीया मतान्युच्चावचानि तु ।
धर्मभीत्या प्रवृत्त्यर्थं नृणां नूनमकल्पयन् ॥ ३८ ॥
अकस्मात्खात्पतद्दृष्ट्वा जलं चकितचेतसः ।
ईशोऽस्तीत्यवदन्केचिन्मूढा अनुययुश्च तान् ॥ ३९ ॥
यद्देश्याः पुरुषाः सर्वे ऐकमत्यस्वभाविनः ।
तद्देश्यानां मतमपि दृष्टमेकपथाश्रितम् ॥ ४० ॥
निसर्गाद्भिन्नमतयो यद्देश्याः सन्ति मानवाः ।
तत एव हि तद्देश्यैः कृतं बहुपथं मतम् ॥ ४१ ॥
बह्वाश्चर्याणि श्रूयन्ते यानि ग्रन्थेषु केवलम् ।
नैकमप्यधुना तेषु दृश्यते कर्हिचित्क्वचित् ॥ ४२ ॥
तथा हि मनुजैः सार्धं संवादा ईश्वरस्य च ।
अशरीरास्तथा वाचो धर्मविश्वासकारिकाः ॥ ४३ ॥
एवमाश्चर्यकर्माणि धर्मश्रद्धाप्रदानि तु ।
क्षणे क्षणे प्रजातानि श्रूयन्ते ग्रन्थमात्रतः ॥ ४४ ॥
नैकमप्यधुना कस्मादृश्यते धर्मकाङ्क्षिभिः ।
नृणां तद्भञ्जनायैव सर्वं धूर्तैः प्रकल्पितम् ॥ ४५ ॥
प्रमत्तानामिदं गीतं तर्कसंपर्ककर्कशम् ।
निरोद्धुं कः समर्थोऽस्ति शुष्कतर्कसमाश्रयः ॥ ४६ ॥

---

१ 'यदि वापि मतं'—आ, इ.

यद्यप्यत्र वदेत्कश्चिद् बुद्धिमान् किञ्चिदुत्तरम्।
तस्याप्यन्यो वदेदेव नान्तस्तर्कस्य विद्यते ॥ ४७ ॥
अपहाय ततो दोषांस्तर्कदृष्टिसमीक्षितान्।
कार्यः शास्त्रे सुविश्वास आत्मनो भद्रमिच्छता ॥ ४८ ॥
अथापि धर्मज्ञानार्थं वेदशास्त्राविरोधतः।
नरस्तर्कं प्रयुञ्जानो न दुष्टो मनुरब्रवीत् ॥ ४९ ॥
द्विस्वभावा हि पुरुषा नास्तिका आस्तिका इति।
यत्स्वभावो भवेद्यस्तु तथार्थं सोऽधिगच्छति ॥ ५० ॥
क्रियन्ते यादृशास्तर्का बालिशैर्धर्महन्तृभिः।
न ते कृतधियां चित्तमधिरोहन्ति जातुचित् ॥ ५१ ॥
तर्का यद्यपि भूयांसो वाक्स्तम्भाय प्रदर्शिताः।
तथापि विश्वरचना करोत्यास्तिकतां दृढाम् ॥ ५२ ॥
ईशो नास्तीति जल्पन्तो मूढान्मन्यन्त आस्तिकान्।
त एव वस्तुतो बाला इति जानन्ति सूरयः ॥ ५३ ॥
तत्त्वेषु लौकिकार्थानामपि मुह्यति यन्मतिः।
धर्मतत्त्वं दूषयन्तः किं ते न बत बालिशाः ॥ ५४ ॥
यश्च मूढतमो लोके यश्च बुद्धेः परं गतः।
तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः ॥ ५५ ॥
भवद्भिरपि तर्केण यदि दोषाः प्रकल्पिताः।
तावता ब्रूत किं त्याज्य एष पन्थाः सनातनः ॥ ५६ ॥

---

१ एतदादि श्लोकषट्कम् आ पुस्तके नास्ति, इ पुस्तके च शोधरूपेण पश्चाल्लिखितं दृश्यते.

को वेद धातुराकूतं तत्त्वं धर्मस्य चैव यत् ।
अन्यस्य चान्यथा भानं ननु स्वाभाविकं नृणाम् ॥५७॥[1]
कुर्युर्यद्यपि वाक्स्तम्भं कुतर्का भवदीरिताः ।
तथापि वैदिकाद्धर्मात्सतां श्रद्धा न हीयते ॥ ५८ ॥
तस्मान्मोघा भवत्तर्का अत्यल्पधिषणोद्भवाः ।
सर्वशुद्धतमं शास्त्रं श्रद्धेयं हितकाङ्क्षिभिः ॥ ५९ ॥

इति शास्त्रतत्त्वविनिर्णये शास्त्रश्रद्धावश्यकताकथनपूर्वकतर्काप्रतिष्ठान-निरूपणं नाम चतुर्थोऽध्यायः ॥ ४ ॥

---

१ अत उत्तर "घटकुड्यादिनर्माणे या तावच्छिल्पिना कृतिः । सापि न ज्ञायते पुम्भिः सहस्राभ्यासवर्जितैः ॥ किं पुनर्जगता कर्तुरचिन्त्यकृतिशालिनः । ज्ञायेत सहसा तत्त्व यच्छास्त्रेषु प्रदर्शितम् ॥ गम्भीरः शास्त्रविषयो न ग्राह्योऽल्पमनीषया । न च दूषयितुं योग्यः स्वबुद्धिकृतनिश्चयैः ॥" इति श्लोकत्रयमधिकम् आ पुस्तके इ पुस्तके त्वेतच्छ्लोकत्रय प्राग्लिखितमपि पश्चान्निष्कासित दृश्यते.

पञ्चमोऽध्यायः

[1]येऽर्थाः शास्त्रेषु संप्रोक्ताः सन्तस्ते किं तु दुर्गमाः।
अवबोधाय चैतेषामुपपत्तिः प्रदर्श्यते ॥ १ ॥
ईश्वरः स्वर्गनरकौ धर्माधर्मादिकं च यत्।
सत्यं मत्वोपपाद्यं तद् युक्त्या तदनुकूलया ॥ २ ॥
सत्यान्मत्वैव शास्त्रार्थानुपपत्त्योपपादयेत्।
नोपपत्त्यनुरोधेन ते दूष्या इति मे मतिः ॥ ३ ॥
ननु शास्त्रप्रमाणत्वपरीक्षावश्यमर्ह्यते।
नो चेद् धूर्तकृतं किञ्चिन्मतं मन्तव्यतां व्रजेत् ॥ ४ ॥
अत्रोच्यते—
यदि कश्चिन्महाबुद्धिः सर्वतः सूपपत्तिमत्।
धूर्तः प्रकल्पयेच्छास्त्रं परीक्ष्येतास्य किं ततः ॥ ५ ॥
बुद्धिमन्तो नरा धूर्ताः शङ्कयुः कर्तुमीदृशम्।
बुद्धिमान्कल्पयेद्यत्तत्सदोषं कल्पयेत्कुतः ॥ ६ ॥
अल्पमल्पकथं चैव सर्वतः सूपपत्तिमत्।
बुद्धिमांश्चेन्मतं कुर्यात् क्रियतामस्य किं ततः ॥ ७ ॥

---

१ अतः पूर्वं 'श्रीः' इत्यधिकम् अ पुस्तके, 'हरये नमः' इति आ इ पुस्तकयोश्च.

परीक्षा सुप्रयुक्तापि नेह स्यात्कार्यकारिणी ।
सदोषार्थविहीने हि परीक्षा किं करिष्यति ॥ ८ ॥
तस्मादेवंविधाः शङ्का निरर्था एव केवलम् ।
किं त्वार्यैः संमतं यद्यत्तत्प्रमाणमिति स्थितिः ॥ ९ ॥
श्रुतिस्मृत्यादिकं शास्त्रं पूर्वैरार्यैः सुसंमतम् ।
वेदाः प्रमाणमूर्धन्या एष पन्थाः सनातनः ॥ १० ॥
वयं हि भगवद्वाचि दृढं विश्वसिमः श्रुतौ ।
श्रद्धा चलति नास्माकमप्यसत्कल्पनाशतैः ॥ ११ ॥
वेदानां भारतादेश्च शास्त्रस्य मानवस्य च ।
वाक्प्रागल्भ्यादनिर्वाच्याद् भूयः श्रद्धा विवर्धते ॥ १२ ॥
निरुक्तब्राह्मणादीनां सूत्रादीनां तथैव च ।
वाङ्माधुर्यादनिर्वाच्याद् भूयः श्रद्धा विवर्धते ॥ १३ ॥
तदेतदैश्वरं शास्त्रं प्रसन्नं गूढहेतुमत् ।
शङ्कापङ्कनिरासार्थं बोधार्थं चोपपाद्यते ॥ १४ ॥
शास्त्रानुगैवोपपत्तिर्नोपपत्त्यनुगं तु तत् ।
स्वतःप्रमाणकं शास्त्रमुपपत्तिस्तु तद्विदे ॥ १५ ॥
ईश्वरः स्वर्गनरकौ धर्माधर्मादिकं च यत् ।
सत्यं मत्वोपपाद्यं तद्युक्त्या तदनुकूलया ॥ १६ ॥
सत्यान्मत्वैव शास्त्रार्थानुपपत्त्योपपादयेत् ।
नोपपत्त्यनुरोधेन ते दूष्या इति मे मतिः ॥ १७ ॥

उपपत्त्यनुरोधाच्चेच्छास्त्रप्रामाण्यमिष्यते ।
लाघवात्स्वर्गनरकौ धर्मान्यौ च न सिध्यतः ॥ १८ ॥
ईश्वरादभवन्सर्वे यद्वा स्वपितृमातृतः ।
मृतेरूर्ध्वं विलीयन्ते लाघवादस्त्विदं वरम् ॥ १९ ॥
एतावानेव वै शास्त्रे यस्मिन्नर्थो भवेन्मतः ।
तदेव युक्तमन्यानि हेयानीत्यपि सेत्स्यति ॥ २० ॥
किमर्थौ स्वर्गनरकौ धर्माधर्मकथा वृथा ।
यावज्जीवमुषित्वेह लंघयन्त इति लाघवात् ॥ २१ ॥
नाधर्मप्रभवं दुःखं न धर्मप्रभवं सुखम् ।
तत्तत्संयोगजं दुःखं तत्तत्संयोगजं सुखम् ॥ २२ ॥
शीताद्यर्थान्सेवमानः पीड्यते च ज्वरादिभिः ।
स्वाद्वन्नमथ भुञ्जानो नीरोगः सुखमेधते ॥ २३ ॥
तदेवं युक्तिसिद्धाभिर्बह्वीभिरुपपत्तिभिः ।
दूष्यन्तां किमु शास्त्रोक्ता अर्था धर्मादिकास्तु ये ॥ २४ ॥
किं तु शास्त्रेषु ये प्रोक्ता अर्थाः साधव एव ते ।
इति मत्वोपपत्तिस्तु तद्बोधाय प्रयुज्यताम् ॥ २५ ॥
योऽयं शास्त्रोदितोऽर्थोऽसौ संभवेद्वा न संभवेत ।
इति शङ्कानिरासार्थं बोधार्थं चोपपाद्यते ॥ २६ ॥
सुग्रहो जायते ह्यर्थो दृष्टान्तादैर्निरूपितः ।
असंभवादिशङ्काश्च गच्छन्त्यर्थोपपादनात् ॥ २७ ॥

तथा हि लोकनृपतिदृष्टान्तादिभिरीश्वरः ।
तत्तत्कर्मफलं यच्छत्येवमादि प्रबोध्यते ॥ २८ ॥
अर्थधर्मादिकं सत्यं मत्वा शास्त्रैकमानतः ।
सिद्धस्यैव गतिर्ह्येषा दृष्टान्तादैः प्रकल्प्यते ॥ २९ ॥
तिरस्क्रियेत चेच्छास्त्रवचो धर्मादिबोधकम् ।
तथापि तर्कसिद्धाया उपपत्तेस्तु न क्षतिः ॥ ३० ॥
यथा राजा प्रजाकर्मफलं यच्छति वै तथा ।
ईश्वरेणापि तद्देयमित्येवं नियमः कुतः ॥ ३१ ॥
क्रीडार्थमीश्वरोऽस्राक्षील्लोकांस्ते मृत्यनन्तरम् ।
मुच्यन्त इत्येव परं लाघवादुपपद्यते ॥ ३२ ॥
किं च सृष्टेः पूर्वकाले नासञ्जीवास्तु केचन ।
असन्तः स्वेच्छया सृष्टा ईशेनेति भवन्मतम् ॥ ३३ ॥
इत्थमीशेन सृष्टेषु तेषु पापकृतां नृणाम् ।
अनन्तो नरके वास इति तावदसंभवि ॥ ३४ ॥
कथमीशस्त्रिकालज्ञस्तेषां वै दोषशालिताम् ।
भविष्यत्कालिकीं जानन्दुःखभोगाय तान्सृजेत् ॥ ३५ ॥
मत्सृष्टेषु भविष्यन्ति खल्वेते पापबुद्धयः ।
ततोऽतिदुःखभोक्तार इति जानन्कथं सृजेत् ॥ ३६ ॥
न हि दोषावहं वस्तु प्राकृतोऽपि सिसृक्षति ।
दयालुश्च भविष्यज्ज्ञः कथं दुःखाय तान्सृजेत् ॥ ३७ ॥

ये तावदीशसृष्टेषु स्वर्गतास्तज्जनुर्वरम् ।
ये पुनर्नरकावासास्तेषां सृष्टिर्निरर्थिका ॥ ३८ ॥
कथं नु दुःखभाजः स्युः सृज्यैरन्नैव ते यदि ।
न दयालोरिदं योग्यं सृष्ट्वा तद्दुःखदर्शनम् ॥ ३९ ॥
तस्मान्न स्वर्गनरकौ धर्माधर्मौ निरर्थकौ ।
उपपत्त्या त्विदं सिध्येच्छास्त्रं चेदवमन्यते ॥ ४० ॥
नन्वीश्वरः कर्मफलं न दद्याद्यदि चेत्तदा ।
प्रजा भवेयुरुद्वृत्ता इत्येतत्सोपपत्तिकम् ॥ ४१ ॥
अत्रोच्यते—
कर्मणः फलमस्तीति सर्वे जानन्ति यद्यपि ।
तथापि लोके दुर्वृत्ताः सन्त्येव बहवो नराः ॥ ४२ ॥
ये तावत्साधवो लोके ते तु सद्वृत्तमास्थिताः ।
अथ दुष्टस्वभावानां न स्वप्ने पापजं भयम् ॥ ४३ ॥
तथा धर्माद्यभावेऽपि ये तावत्सत्स्वभाविनः ।
परदुःखानि जानन्तः पीडयेयुर्न ते परान् ॥ ४४ ॥
अथ दुष्टस्वभावा ये निर्घृणाः परपीडकाः ।
तेषां सत्त्वेऽप्यसत्त्वे वा वृत्तं तूभयथा समम् ॥ ४५ ॥
किं न चार्वाकलोकेषु व्यवहारः प्रवर्तते ।
न ते धर्ममधर्मं वा मन्यन्ते नारकं भयम् ॥ ४६ ॥
स्याद्वेदमीश्वरस्यैव सामर्थ्यं किञ्चिदद्भुतम् ।
व्यवहारो निराबाधो येन लोके प्रवर्तते ॥ ४७ ॥

किं च धर्माधर्मफलं नराणां सत्प्रवृत्तये ।
भवन्मतानुसारेण सर्वथैतन्न सिध्यति ॥ ४८ ॥
भवन्तः खलु मन्यन्ते वयमेव हि धार्मिकाः ।
मतान्तरानुसारिण्यः प्रजास्तूत्पथगा इति ॥ ४९ ॥
तस्माद्धर्माधर्मफलं यद्यपीशेन निर्मितम् ।
तथाप्युत्पथगामित्वं प्रजानां तदवस्थिति ॥ ५० ॥
धर्माधर्मफलं तस्मान्नास्त्येव नरकादिकम् ।
किं तु जीवा मृतेरूर्ध्वं मुक्ता इत्यस्तु लाघवात् ॥ ५१ ॥
उपपत्तिवशादेवं लाघवाद्यनुरोधतः ।
सर्वो लुप्यति शास्त्रार्थो यद्यसाववमन्यते ॥ ५२ ॥
तस्माच्छास्त्रेषु ये प्रोक्ता अर्थास्तदनुकूलगा ।
उपपत्तिः प्रयोक्तव्या न विरुद्धा तु कर्हिचित् ॥ ५३ ॥
अतो वेदपुराणादौ ये येऽर्थाः प्रतिपादिताः ।
सत्या एवोपपत्तिस्तु तद्बोधाय प्रकल्प्यते ॥ ५४ ॥
काचित्तत्रोपपत्तिश्च दूष्या स्यादपि चेद्यदि ।
न दूष्यं तावता शास्त्रमन्यथैवोपपाद्यताम् ॥ ५५ ॥
शास्त्रानुगैवोपपत्तिर्नोपपत्त्यनुगं तु तत् ।
स्वतःप्रमाणकं शास्त्रमुपपत्तिस्तु तद्विदे ॥ ५६ ॥
को वेद धातुराकूतं तत्त्वं धर्मस्य चैव यत् ।
अन्यस्य चान्यथा भानं ननु स्वाभाविकं नृणाम् ॥ ५७ ॥

लोके बुद्धिमतां कृत्यं ज्ञायते नाल्पबुद्धिभिः ।
बुद्धिग्रद्धयोऽपि सर्वेभ्यो भगवान्बुद्धिमत्तरः ॥ ५८ ॥
काश्चिदत्र प्रवक्ष्यन्ते मया या उपपत्तयः ।
न च तावत्य एव स्युरन्यासामपि संभवात् ॥ ५९ ॥
काचिद् दूष्या यदि भवेन्मयोक्तासूपपत्तिषु ।
अन्यास्तत्र प्रकल्प्यन्तां न दूष्यं त्वैश्वरं वचः ॥ ६० ॥
अन्या अपि स्युरत्रार्थे निश्चयेनोपपत्तयः ।
मया त्वत्र प्रदर्श्यन्ते आत्मज्ञानानुसारतः ॥ ६१ ॥

इति शास्त्रतत्त्वविनिर्णये शास्त्रस्योपपत्तिनिरपेक्षस्वतःप्रामाण्यनिरूपणं नाम पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

(पूर्वार्धम्)

तथा हि शास्त्रदृष्टानां बहुत्वादध्वनां तु यः ।
दोषः प्रतीयते तत्र समाधानमिदं शृणु ॥ १ ॥
यद्यपीश्वररूपस्य यथार्थज्ञानमेककम् ।
मुक्तेः साधनमित्याहुर्न प्रकारान्तरं क्वचित् ॥ २ ॥
यथार्थभगवद्रूपावबोधे चैककारणम् ।
वेदान्ता इति सिद्धान्तः श्रुतिषु स्मरणेषु च ॥ ३ ॥
यथार्थं भगवद्रूपं यथा वेदान्तदर्शने ।
कथ्यते तदिहास्माभिरुपरिष्टात्प्रवक्ष्यते ॥ ४ ॥
तथापि मन्दबुद्धीनां तर्कदूषितसंविदाम् ।
न येषामधिकारोऽस्ति तत्त्वे वेदान्तबोधिते ॥ ५ ॥
श्रेयस्तेषामपि भवत्विति मत्वा दयालुना ।
कृताः शास्त्रान्तराध्वानः सर्वेषां हितमिच्छता ॥ ६ ॥
अतर्क्यसदसत्कर्मपरिपाकवशान्नृणाम् ।
आनन्त्यमधिकाराणामुत्तमाधमरूपिणाम् ॥ ७ ॥
दृश्यन्ते पुरुषा लोके येषां वेदान्तदर्शने ।
शुद्धेऽपि श्रुतिसिद्धेऽपि श्रद्धाभावोऽधिकारजः ॥ ८ ॥
तथा हीश्वरकृष्णाद्याः साङ्ख्यमेव गतिं विदुः ।
तर्कविद्यामथ परेऽमन्यन्तोदयनादयः ॥ ९ ॥

एवमन्येऽपि बहवस्तर्कान्दोलितचेतसः ।
नानामार्गान्प्रपद्यन्ते हेतुवादपरायणाः ॥ १० ॥
अनवाप्ताधिकारास्ते वेदान्तार्थावगाहने ।
उपासमाना गोविन्दं स्वस्वदृष्ट्यनुसारतः ॥ ११ ॥
कालेनाप्ताधिकारास्ते ईशोपासनगौरवात् ।
याथार्थ्येन हरिं ज्ञात्वा मुच्यन्ते सर्वबन्धनात् ॥ १२ ॥
ये चैते बहवो मार्गा मन्दबोधप्रयोजनाः ।
वेदान्तबोधद्वारैव तेषां मोक्षे समन्वयः ॥ १३ ॥
नन्वेवमधिकाराणामानन्त्यादध्वनामपि ।
बहुत्वेऽपि कथं तेषां विरोध उपपद्यते ॥ १४ ॥
विरुद्धैरध्वभिर्यान्त एकमर्थं कथं नराः ।
लभेरन्नथ सर्वेषां प्रामाण्यं च सकृत्कथम् ॥ १५ ॥

अत्रोच्यते—

मन्दानां तत्त्वबोधाय शाखादिभिरिवोडुराट् ।
बहुप्रकारैरीशोऽपि वर्ण्यते दर्शनान्तरैः ॥ १६ ॥
शुद्धं भगवतो रूपमाह वेदान्तदर्शनम् ।
तद्विरोधे न तात्पर्यमन्येषां किं तु बोधने ॥ १७ ॥
यथा ह्येकः पुमानाह प्रासादे दृश्यते विधुः ।
अन्यो वदति शाखायां पश्य चन्द्रमसं त्विति ॥ १८ ॥
विरुद्धेऽपि तयोर्वाक्ये सकृत्प्रामाण्यशालिनी ।
सूक्ष्मार्थबोधैकार्थत्वात्तथा शास्त्रेऽपि बुध्यताम् ॥ १९ ॥

किं चाधिकारभेदेन भवेन्मार्गविरोधिता ।
स्थानभेदाद्यतो लोके विरोधो दृश्यतेऽध्वनाम् ॥ २० ॥
यथा काशीं जिगमिषुर्गयास्थो यदि पृच्छति।
तत्रत्यांस्ते ब्रुवन्त्येनं व्रज त्वं पश्चिमां दिशम् ॥ २१ ॥
अथ प्रयागदेशीयः काशीगमनकाम्यया ।
पृच्छञ्जनांस्तु तत्रत्यैः प्राचीं याहीति चोच्यते ॥ २२ ॥
प्राचीपश्चिमगामित्वं विरुद्धमपि सर्वथा ।
भिन्नदेशस्थितेर्हेतोः फलमेकं प्रयच्छति ॥ २३ ॥
तथैवातर्क्यसदसत्कर्मणां परिपाकतः ।
नृभ्यो भिन्नाधिकारेभ्यो नैकोऽध्वा प्रदिशेत्फलम्॥२४॥
इति संचिन्त्य भगवान् करुणावरुणालयः ।
मार्गान्नानाविधांश्चक्रे यैः सर्वे श्रेय आप्नुयुः ॥ २५ ॥
तथा हि सर्वशास्त्रेषु साङ्ख्यकाणादकादिषु ।
तथैव वैष्णवाद्येषूपासामार्गेषु सर्वशः ॥ २६ ॥
पराकृतस्वदोषेषु बहुयुक्तिनिरूपणैः ।
काणादं मन्वते केचित्केचित्साङ्ख्यादिकान्यपि॥२७॥
केचित्तु वैष्णवं मार्गमन्ये शैवादिकांस्तथा ।
पुंसां भिन्नाधिकारित्वस्याभिव्यञ्जकमस्त्यदः ॥ २८ ॥
किं च यस्माज्जगन्नाथश्चक्रे मार्गान्पृथग्विधान् ।
भिन्नाधिकाराः पुरुषा इत्यस्मादपि निश्चितम् ॥ २९ ॥

शास्त्रानुगैवोपपत्तिर्नोपपत्त्यनुगं हि तत् ।
इति यत्प्रागिह प्रोक्तं तच्च ध्येयं क्षणे क्षणे ॥ ३० ॥
यस्मिन् यस्य भवेन्मार्गे रुचिः शास्त्रेण बोधिते ।
तस्मिंस्तस्याधिकारोऽस्तीत्यधिकारस्य बोधकम् ॥ ३१ ॥
इदं च पश्यतेशस्य सामर्थ्यं यदसौ जनः ।
विरोधिष्वपि शास्त्रेषु स्वाधिकारानुसारतः ॥ ३२ ॥
एकं निश्चित्य गृह्णाति न तु मोहं प्रपद्यते ।
एतेन मोहकृच्छास्त्रं नैशमित्यपि खण्डितम् ॥ ३३ ॥
तस्माच्छास्त्रीयमार्गाणां विरोधोऽपि न दोषभाक् ।
फलं चैकं प्रयच्छन्ति दृष्टान्तं तत्र तं स्मर ॥ ३४ ॥
अत आज्ञास्वरूपाणि शास्त्राणि परमेशितुः ।
आदिशन्ति बहून्मार्गान्दोषवन्ति न कर्हिचित् ॥ ३५ ॥
तथैव वैष्णवादीनां मार्गाणां च निदर्शने ।
तस्य तस्यैव माहात्म्यवर्णनं च न दुष्यति ॥ ३६ ॥
तथा ह्येकं परेशानं नानोपाध्युपलक्षणैः ।
बहुधोपदिशन्ति स्म तत्तद्रुच्यनुसारतः ॥ ३७ ॥
न चाप्युपाधिसंबन्धो भवेदीशस्य तावता ।
दुर्ज्ञाने मन्दधीगत्यै तस्य शास्त्रैरुदीरणात् ॥ ३८ ॥
ननु चोपाधिसंबन्धो यद्यलीको भवेत्तदा ।
असत्याशंसिना भाव्यं कथमैशेन तद्वद ॥ ३९ ॥

उच्यते—

दृष्टा किलेयं शिष्टानां रीतिः सूक्ष्मार्थबुद्धये ।
असत्संबन्धकथनं शाखाचन्द्रमसोरिव ॥ ४० ॥
ईशो हि सर्वशिष्टानामाद्यो रीतिप्रवर्तकः ।
दयावान्मन्दबुद्धीनां स्वस्याप्त्यै तदकल्पयत् ॥ ४१ ॥
किं त्वेक एव मार्गेषु मार्गः साक्षात्फलप्रदः ।
स एव सेव्यते सर्वैर्जनैः शुद्धाधिकारिभिः ॥ ४२ ॥
तद्द्वारा प्रापकाश्चान्ये मता मन्दाधिकारिणाम् ।
तत्त्वं तु विरलास्तस्य श्रद्दधाना जना विदुः ॥ ४३ ॥
यथा प्रयागनिलयः क्षिप्रं प्राप्नोति काशिकाम् ।
चित्रकूटनिवासानां प्रयागद्वारिका गतिः ॥ ४४ ॥
नन्वेवं मार्गभेदेऽपि न वस्तुनि विकल्पना ।
भवेत्तर्हि पुराणेषु कथाभेदः कथं स्थितः ॥ ४५ ॥

उच्यते—

कृतैव कल्पभेदेन कथाभेदव्यवस्थितिः ।
इतोऽन्यदुत्तरं यत्स्याद्भवतैव तदुच्यताम् ॥ ४६ ॥
पौराणिकानामज्ञानान्न युक्ता तस्य कल्पना ।
परस्परपुराणार्थान् सर्वे जानन्ति ते यतः ॥ ४७ ॥
सर्वेष्वपि पुराणेषु सर्वेषां नामदर्शनात् ।
एककालोद्भवस्तेषां कर्तुर्ज्ञानं च तर्क्यते ॥ ४८ ॥

न हि जानन्विरुद्धार्थं वक्तुमीहेत कर्हिचित ।
स्वार्थाप्रचारणाद्भिभ्यत् किं पश्यन्गर्तं आपतत् ॥ ४९ ॥
न वा मताभिमानस्य युज्यते तत्र हेतुता ।
असंभवदहंकारा भिद्यन्ते हि कथा अपि ॥ ५० ॥
रामात्कचिल्लक्ष्मणाच्च मृतिः कुम्भश्रुतेः श्रुता ।
कथं स्यादभिमानोऽत्र को वार्थः कस्य हीयते ॥ ५१ ॥
किं च द्वयोर्विवदतोरभिमानो भवेदपि ।
ऋग्वेदे पुनरेकस्यामृचि प्रोक्तं कथाद्वयम् ॥ ५२ ॥
अदितेर्दक्षजन्यत्वं दक्षस्यादितिजन्यता ।
अर्थेऽपि चैकर्गुक्तेऽस्मिन्नभिमानः कथं भवेत् ॥५३॥
एकस्मिन्नेव च ग्रन्थे क्वचिदर्थद्वये क्षणात् ।
न विरोधेऽस्ति तात्पर्यमिति किं नावबुध्यते ॥ ५४ ॥
नन्वेकस्य स्तुतावन्यनिन्दा या परिदृश्यते ।
दोष आभाति सोऽस्माकमिति चेदुच्यते शृणु ॥ ५५ ॥
अहो ते कुशला बुद्धिरिति क्रोधपुरस्सरम् ।
वचो न भजति स्वार्थं किं तु गर्हापरं हि तत् ॥ ५६ ॥
तस्मान्नैवप्रतीतार्थः सर्वत्र परिगृह्यते ।
लोकेऽपि व्यवहारोऽसौ का तु शास्त्रे विचारणा ॥५७॥
किं तु लौकिकवाक्यस्य सुलभोऽस्त्याशयग्रहः ।
गम्भीरस्य तु शास्त्रस्य न्यायसाहाय्यतो भवेत् ॥ ५८ ॥

तथा च न हि निन्दाख्यन्यायस्य परिशीलनात् ।
तस्य शास्त्रस्यखल्वेवमभिप्रायः प्रतीयते ॥ ५९ ॥
अन्येषामवमत्वोक्तिं विना स्तुत्यप्रशंसनम् ।
निरङ्कुशं न हि भवेदिति स्तुतिपरं हि तत् ॥ ६० ॥
अत एव हि सर्वत्र श्रुतेः प्रामाण्यमुच्यते ।
क्वचिदन्यप्रशंसायां गुणवाद इतीर्यते ॥ ६१ ॥
तथैव गङ्गास्नानादेर्यात्रामूर्त्यर्चनादिनः ।
उक्तेऽपि पुण्यहेतुत्वे निषेधो यः क्वचित्स्थितः ॥ ६२ ॥
तस्यापि खलु तात्पर्यं विदुस्तात्पर्यवेदिनः ।
चित्तशुद्धिमनोदान्तीश्वरज्ञानादिसंस्तवे ॥ ६३ ॥
तथा हि सूक्ष्मबुद्ध्यैतच्छ्रद्धया च विचार्यताम् ।
न खल्वाकस्मिकी निन्दा मूर्त्यर्चादेः कृता क्वचित् ॥६४॥
किं तु हृच्छोधनादीनां प्रस्तावेष्वेव दृश्यते ।
न चाभिमानमूलत्वशङ्कायाश्चात्र संभवः ॥ ६५ ॥
एषैव रीतिरन्यासां निन्दानामपि दृश्यते ।
तस्माद्विरोधे तात्पर्यं न तासां किं तु तत्स्तुतौ ॥ ६६ ॥
एकस्मिन्नेव च ग्रन्थे मिथो न्यूनत्वदर्शनात् ।
न विरोधेऽस्ति तात्पर्यमिति किं नावबुध्यते ॥ ६७ ॥
एवं विष्ण्ववताराणां शाक्तत्वं प्रोच्यते क्वचित् ।
तं च शक्तिप्रशंसार्थमर्थवादं प्रचक्षते ॥ ६८ ॥

भूयोऽभ्यस्तार्थतो यो हि विरुद्धोऽर्थः प्रतीयते।
तमर्थवाद इत्याहुः प्रशंसैकप्रयोजनम् ॥ ६९ ॥
विरोधे तुल्यबलयोः कल्पभेदाद्व्यवस्थितिः ।
इत्थं शास्त्राशयोऽगम्यो न्यायसाहाय्यमन्तरा ॥ ७० ॥
तस्मादगम्यशास्त्रीयविषयेष्वल्पबुद्धिभिः ।
न वाच्यः सहसा दोषो बुद्धेरल्पत्वमूह्यताम् ॥ ७१ ॥
अथो चतुर्षु वेदेषु शङ्कन्ते यत्परे जनाः ।
भाषाभेदकृतं दोषं तं तु नोपलभामहे ॥ ७२ ॥
चतुर्वेदीयमन्त्राणां ब्राह्मणानां तथैव च ।
वेदान्तानामपि तथा भाषैकैवोपलभ्यते ॥ ७३ ॥
अथाथर्वणवेदीयोपनिषत्सु तु कासुचित् ।
भाषा श्रुतिविजातीया दृश्यते लौकिकीति चेत् ॥७४॥
आस्तां किं तावता वेदमहिमा क्षतिमृच्छति ।
अपि चोरैः समाक्रान्तः किं साधुरपि दूष्यते ॥ ७५ ॥
विचित्रे हि जगत्यस्मिञ्जना नानाविधाः स्थिताः।
कः किं करिष्यतीत्यस्य ज्ञाता को नाम विद्यते ॥ ७६ ॥
का स्त्री त्याज्या भुजङ्गानां किमग्राह्यं च लोभिनाम्।
को न तुच्छो मदान्धानां किमकार्यं दुरात्मनाम् ॥७७॥
न तावता तु वेदानां हीयेत महिमा क्वचित् ।
न हि काचशतैर्व्याप्तं रत्नं मौल्येन हीयते ॥ ७८ ॥

अथ मन्त्रब्राह्मणानां वेदान्तानां च वै मिथः ।
किञ्चित्प्रभिद्यतेवाक्साविषयस्य भिदावशात् ॥ ७९ ॥
यथा ह्येककृते ग्रन्थेया वाक्न्यायमये भवेत् ।
न सा व्याकरणग्रन्थे तथैवात्रापि मन्यताम् ॥ ८० ॥
निश्वासवत्परेशाच्च श्रुतस्तेषां समुद्भवः ।
स्वात्मानं विधिरूपं स स्वयं वेदानजिग्रहत् ॥ ८१ ॥
ततस्ते ऋषिभिर्दृष्टा मन्त्राः स्वस्वतपोबलात् ।
तत्तद्दर्शनतस्तत्तन्मन्त्रर्षित्वमथाप्नुवन् ॥ ८२ ॥
वयं हि भगवद्वाचि दृढं विश्वसिमः श्रुतौ ।
श्रद्धा चलति नास्माकमप्यसत्कल्पनाशतैः[1] ॥ ८३ ॥
यस्त्वाधुनिकवृत्तान्तकथनाद्दोष उच्यते ।
त्रैकालिकज्ञेशवाचि को दोषः स भवेच्छ्रुतौ ॥ ८४ ॥
विचारेण यतः सिद्धमनादित्वं च संसृतेः ।
भूतार्थकप्रयोगाश्च नैव दुष्यन्ति सर्वथा ॥ ८५ ॥
ननु त्यक्त्वा परात्मानं वह्नीन्द्रादिदिवौकसाम् ।
सपर्यारूपिणो यज्ञा उपदिष्टाः कथं श्रुतौ ॥ ८६ ॥
उच्यते—
यावन्ति खलु कर्माणि द्विजानां विहितानि तु ।
वेदे तैरखिलैरीशो भगवानेव पूज्यते ॥ ८७ ॥

---

१. ' ० नाशनैः '—इ.

अभ्यर्च्य परमात्मानं ब्राह्मणः स्वेन कर्मणा ।
इत्येवं बहुधा दृष्टं गीताशास्त्रादिषूदितम् ॥ ८८ ॥
किं त्विन्द्रमुखदेवानां तुष्टः सत्कर्मभिर्विभुः ।
द्वारत्वमात्मनस्तेभ्यः पूज्यत्वमपि दत्तवान् ॥ ८९ ॥
अग्नौ प्रत्ताहुतीः सर्वा इन्द्राद्या एव भुञ्जते ।
तद्द्वारा प्रीयते किं तु यज्ञात्मा विष्णुरेव हि ॥ ९० ॥
यदा तत्तत्कर्मफलं कर्मिभ्यो दातुमिच्छति ।
तद्द्वारैव ददातीशो भृत्यद्वारेव भूपतिः ॥ ९१ ॥
यस्य यस्य यथा कर्म न्याय्यं तस्य तथा फलम् ।
इति सत्कर्मकारिभ्यो देवेभ्यः पूज्यतां ददौ ॥ ९२ ॥
यतश्च पूज्यतां न्यायाद्देवेभ्यो दत्तवान्विभुः ।
ततः सर्वैश्च पूज्यास्ते प्रीत्यर्थं परमात्मनः ॥ ९३ ॥
ईशाज्ञापालनं धर्मस्तदेवेशस्य पूजनम् ।
विपरीतस्त्वधर्मः स्यादपराधः स एव हि ॥ ९४ ॥
जगच्चक्रप्रवृत्त्यर्थमाज्ञप्ता ब्राह्मणा यतः ।
ततोऽपीशाज्ञया कार्या अवश्यं ब्राह्मणैः क्रियाः ॥ ९५ ॥
यज्ञायत्तं जगच्चक्रमत ईशोऽसृजद् द्विजान् ।
अतस्तत्प्रीतये कार्यं कर्मावश्यं द्विजातिभिः ॥ ९६ ॥
किं च स्वकर्मभिः सत्त्वशुद्धिः संजायते यतः ।
ततश्च ज्ञानयोग्यत्वं कर्मावश्यकताप्यतः ॥ ९७ ॥

---

१. आ इ पुस्तकयोः ' यज्ञेशो भगवान् हरिः ' इति पाठः प्रागाधीत्रः पश्चात्संशोध्य अ पुस्तकवद्विहितो दृश्यते.

भवतामपि नैवासौ नियमोऽस्ति विनिश्चितः ।
कदाचिन्नैव कर्तव्यमीश्वरान्यस्य पूजनम् ॥ ९८ ॥
क्रियते हि नृपादीनां धनाद्यर्थमुपासना ।
सत्त्वशुद्ध्यादिसिद्ध्यर्थं पूज्यन्ते देवतास्तथा ॥ ९९ ॥
गङ्गास्नानादिका धर्मास्तीर्थयात्रादिकाश्च ये ।
नृणामावृतबोधानां सत्त्वशुद्ध्यर्थमेव ते ॥१००॥
यतो ह्यशुद्धसत्त्वानां शुद्धोऽप्यर्थो न रोचते ।
सत्त्वशुद्धिस्ततः पुंसामस्ति मुक्त्युपयोगिनी ॥१०१॥
यथार्थमेव तत्सर्वं यतः शास्त्रेण बोधितम् ।
धर्माधर्मगतिः सर्वा शास्त्रादेव हि बुध्यते ॥१०२॥
या च वेदे कर्मकाण्डे वह्नित्रायुत्वादिसंस्तुतिः ।
ज्ञेया सा नेश्वराज्ञानाद्भागः कर्मपरो हि सः ॥१०३॥
तथा ह्युपनिषद्भागे परमेश्वरवर्णने ।
वह्न्यादेः कर्मकारित्वमीशभीत्या निरूप्यते ॥१०४॥
न तस्मादीश्वराज्ञानं श्रुतावारोप्यतां क्वचित् ।
वह्न्यादीनां सेवकत्वमीश्वरस्य यतो जगौ ॥१०५॥
किं च केवलकर्मिभ्य ईश्वरज्ञानिनः श्रुतौ ।
उत्कृष्टत्वेन वर्ण्यन्ते साक्षादीश्वरपूजकाः ॥१०६॥
किं चानित्यफलत्वं च वदन्ती सर्वकर्मणाम् ।
ईशज्ञानादेव मुक्तिरिति प्राह श्रुतिः स्वयम् ॥१०७॥

ननु नाकसदामिन्द्रप्रभृतीनां कृतांहसाम् ।
पूजा श्रुतिषु संदिष्टा कथं नामोपपद्यते ॥१०८॥
उच्यते—
करणाद् भूरिपुण्यानां महत्त्वं ते प्रपेदिरे ।
दातारश्चेष्टकामानां पूजनात्पुण्यकारिणः ॥१०९॥
ततो जगत्प्रवृत्त्यादिसत्त्वशुद्ध्यादिसिद्धये ।
यज्ञादिकर्मभिः पूजा त्रिदशानां विधीयते ॥११०॥
अथ यत्र तु देवानां पातकाचरणं श्रुतम् ।
शुद्धिश्च श्रूयते तत्र तदंहोदण्डदर्शनात् ॥१११॥
को नाम विद्यते लोके देही पापविवर्जितः ।
किं तु शुध्यति दण्डेन न्यायोऽसौ परमात्मनः ॥११२॥
तथा ह्यहल्यागामित्वं श्रुतं यत्र बिडौजसः ।
तत्रैव शापात्तद्भर्तुः श्रुतो दण्डस्तदंहसः ॥११३॥
ततः शुद्धात्मनस्तस्य पुण्यासादिततेजसः ।
शतक्रतोर्न दोषाय सपर्येशानुशासनात् ॥११४॥
धर्मैरासाधिकारास्ते श्रेष्ठा दिविषदो यतः ।
ईशप्रियाश्च ते तस्माद्युक्ता तेषामपि स्तुतिः ॥११५॥
तस्मात्कर्मप्रकरणे स्तुतेऽपि मरुदादिके ।
नाज्ञानं कल्पनीयं हि परमेशस्य तावता ॥११६॥
ईशप्रतीकरूपेण या तु सूर्याद्युपासना ।
मूर्त्यादेरपि संदिष्टा सेशभावनयैव हि ॥११७॥

व्यापको हि स्मृतो देवो निर्लेपश्च वियद्यथा ।
तद्बुद्ध्या पूज्यते यत्र तत्र स्वीकुरुतेऽर्चनम् ॥११८॥
किं त्वाज्ञा तस्य यत्रास्ति तत्रैवासौ समर्च्यते ।
यतः शास्त्रं प्रमाणं नः कार्याकार्यव्यवस्थितौ ॥११९॥
अथ विष्णुस्तु वेदेषु तुल्यभाषायुतेष्वपि ।
ईशत्वेनैव कथितो नात्र कार्या विचारणा ॥१२०॥
तथा हि विष्णुरूपत्वं यज्ञानां कथ्यते श्रुतौ ।
ततश्च सर्वयज्ञानां तत्परत्वं प्रतीयते ॥१२१॥
किं च प्राप्यं मुमुक्षूणां वैष्णवं पदमुच्यते ।
वेदेषु तुल्यभाषेषु संशयो नेह कश्चन ॥१२२॥
तमेव परमात्मानं नानारूपैस्तथा गुणैः ।
तत्तद्रुच्यनुसारेण जगुः पौराणिकादयः ॥१२३॥
रजःसत्त्वतमोरूपैः सृष्टिस्थित्यन्तहेतुभिः ।
गुणैर्जगुः परात्मानं ब्रह्मविष्णुशिवात्मकम् ॥१२४॥
वस्तुतस्तु न चोपाधेः संबन्धः परमेश्वरे ।
इत्यादि यत्तु सकलं मया प्राक् तन्निरूपितम् ॥१२५॥
यथा हि स्फटिको भाति नानारूप उपाधिभिः ।
स्वयं विकाररहितस्तथेश इति मन्यताम् ॥१२६॥
प्रकृतेस्त्रिगुणैर्भेदमभिन्नस्य प्रकल्प्य हि ।
अधिकारानुरोधेन वर्णयामासुरीश्वरम् ॥१२७॥

न तावता परेशस्य न्यूनत्वं मन्यतां क्वचित्।
सृष्टिस्थित्यन्तकर्तृत्वं महिम्ने ह्यवकल्प्यते[1] ॥१२८॥
यद्यपीदं तु वेदेषु नातिस्पष्टतयोच्यते ।
तथापि मुनिभिर्देवचोदितैर्विशदीकृतम् ॥१२९॥
वेदेभ्यो हि स्फुटा भाषा भारतादिंषु[2] दृश्यते ।
किञ्चिद् भिन्ना पुराणेभ्यः स्मृत्यादिष्वपि तादृशी ॥१३०॥
तेभ्योऽतिविशदा वाणी पुराणेष्वनुलक्ष्यते ।
उत्तरोत्तरमन्दानां हितार्थं ह्युत्तरोत्तरम् ॥१३१॥
अपि चैतेषु सर्वेषु मिथो नाम्नां प्रकीर्तनात्।
अप्रामाण्यं न कस्यापि शङ्कितुं शक्यमञ्जसा ॥१३२॥
किं तु धूर्तैः पुराणादौ स्वकाव्यानि क्वचित्क्वचित्।
निवेश्यन्तेऽभिमानेन मतादेरिति शुश्रुम ॥१३३॥
न येषु लक्ष्यते ह्यार्षी प्रगल्भा वाक्सुबुद्धिभिः।
बह्वयस्तेष्वेव दृश्यन्ते वाचोऽहङ्कारयोनयः ॥१३४॥
तथापि चोरैराक्रान्तो न साधुरपि दूष्यते ।
इत्यादिकं तु सकलं प्रागेवाहमिहोक्तवान् ॥१३५॥
अथ ये कृष्णलीलासु दोषमाहुः स्वया धिया ।
न तत्समुचितं तेषामतिस्वल्पधियां किल ॥१३६॥

---

१. 'ह्यवकल्पते' इति पाठस्त्रिष्वपि अ आ इ पुस्तकेषु.

२. अ पुस्तके अत आरभ्य ३१-३२ अङ्कात्मकं पत्रद्वयं नष्टम्.

केश्वरोऽनन्तदुर्ज्ञेयलीलश्चानेकहेतुवित् ।
क्व जीवाः क्षुद्रधिषणा अहो साहसमस्त्यदः ॥१३७॥
सर्वाः स्त्रियश्च पुरुषा यदीया एव केवलम् ।
तस्मिंस्तु व्यभिचारादीन् शङ्कन्ते यत्तदद्भुतम् ॥१३८॥
गोपीभिः प्रार्थितोऽरंस्त तासु किं वान्यकारणात् ।
इत्यादि धातुः को वेद लीलानां कारणं तु यत् ॥१३९॥
उत्तेजिकास्ति तल्लीला पापस्येत्यपि वाग्वृथा ।
न काप्युत्तेजनं दृष्टं पापानामीशलीलया ॥१४०॥
प्रत्युतेश्वरलीलासु ये रताश्चित्तपूर्वकम् ।
तेषां विरक्तिः संसारात्पापादपि च दृश्यते ॥१४१॥
इमं पश्यत लीलानां प्रभावं परमात्मनः ।
यासु प्रेमोद्भवे पुंसो जायते शुद्धमानसम् ॥१४२॥
शृङ्गारादिरसैः पूर्णा अपि लीलाः परात्मनः ।
जनयन्ति मनःशान्तिं [1]किं तच्चित्रं जगद्गुरौ ॥१४३॥
इदमेवैश्वरं कृत्यं यत्सन्मार्गे प्रवर्तनम् ।
न तस्य धर्मैरासव्यं हेयं वाप्यस्त्यधर्मतः ॥१४४॥
त्यक्तसर्वार्थरागाभ्यो गोपीभ्यो दिशता शिवम् ।
ईशैकतानतायास्तु महिमा संप्रदर्शितः ॥१४५॥

---

१. 'किं तच्चित्रमधोक्षजे'—आ. इ पुस्तकेऽपि प्रागयमेव पाठ आसीद्यः पश्चात्संशोध्य 'किं तच्चित्रं जगद्गुरौ' इति विहितः.

अर्जुनायोपसन्नाय विश्वरूपमदर्शयत् ।
कृष्णायाः पालयंल्लज्जां सभां वस्त्रैरपूरयत् ॥१४६॥
प्रेम्णाथ कृष्णयाहूतः शाकपत्रेण तर्पितः ।
दुर्वाससः सशिष्यस्यानाशयद्गर्वपर्वतम् ॥१४७॥
प्रगायतां स्ववीर्याणि स्वान्त आविर्भवन् हरिः ।
अपाकरोति मालिन्यं मनःशान्तिं च यच्छति ॥१४८॥
गायतां श्रद्दधानानां पावनीर्भगवत्कथाः ।
शुद्धिमेति यथा चित्तं तत्सतामानुभाविकम् ॥१४९॥
यदुनन्दन—गोविन्द—राम—कृष्णेति वल्गताम् ।
यदुद्भवति नः प्रेम किं ब्रूमो भवतां पुरः ॥१५०॥
धृत्वावतारं स्वीयाभिर्लीलाभिर्भगवाञ्जनान् ।
कुरुते साधुहृदयान् किमन्यद्धि करोतु सः ॥१५१॥
नास्माकमधिकारोऽस्ति चरितेषु परात्मनः ।
दोषानल्पधिया धातुं को वेदास्याशयं परम् ॥१५२॥
अल्पदृष्टिकृतैर्दोषाभासैश्चेद् दूष्यते विभुः ।
किं भवत्संमतेशेऽपि दोषाशङ्का न जायते ॥१५३॥
तथा हि दुःखफलके प्रवृत्तांन्पातके नरान् ।
हितेच्छुः शक्तियुक्तोऽपि निवर्तयति किं न हि ॥१५४॥
न धावत्यर्भके नातः शङ्कमानोऽपि तत्क्षतिम् ।
अपेक्षते तत्पतनं किं त्वेनं निरुणद्ध्यसौ ॥१५५॥

तस्माद् व्यसनितैवेशे ह्यशक्तिर्वा प्रकल्पिता ।
भवदीये मत इति सुव्यक्तं प्रतिभाति नः ॥१५६॥
प्रवृत्तावेव जीवानां निरुद्धायां तु पाप्मनि ।
कथं कुर्युस्ततः पापं दुःखं वा प्राप्नुयुः कथम् ॥१५७॥
न चैतदकरोदीशः सर्वशक्तियुतोऽपि सन् ।
तस्मादीशे भवेत्सिद्धा गौरवाप्रतिभाप्युत ॥१५८॥
कष्टं यदसृजज्जीवान् धर्मैकप्राप्यमङ्गलान् ।
पापात्तु बहुदुःखार्हाननिवर्त्यप्रवृत्तिकान् ॥१५९॥
कथं नु दुःखभाजः स्युः सृज्यैरन्नैव ते यदि ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥१६०॥
अनाहतानन्तशक्तावपारकरुणानिधौ ।
प्राणिनामिच्छति श्रेयः साक्षाज्जाग्रत्यपीश्वरे ॥१६१॥
जनान्वञ्चयतीशस्य कथं विगतसाध्वसः ।
पापः पिशाचकः कश्चित् पातकेषु प्रवर्तयन् ॥१६२॥
ईशाशयं न जानीमो वयमित्युच्यते यदि ।
तदेवोत्तरमस्माकमपि तर्ह्यत्र बुध्यताम् ॥१६३॥
तस्मान्न शङ्क्यतां जातु किञ्चिदीश्वरकर्मसु ।
बुद्धिर्हि तनुरस्माकं[1] नार्हतीशपरीक्षणम् ॥१६४॥
किं च या अकरोल्लीला भगवान्गोकुले हरिः ।
ता हि पौगण्डवयसि न तूपनयनात्परम् ॥१६५॥

---

१. अत आरभ्य ग्रन्थभागः अ पुस्तकेऽपि पठ्यते.

अनन्तरं तूपनीतेर्विद्याग्रहणपूर्वकम् ।
धर्म एव हि कृष्णेन कृतः शास्त्रेषु दृश्यते ॥१६६॥
तथैवाहापि गीतासु भगवानर्जुनं प्रति ।
आप्तकामोऽपि धर्मस्य स्थित्यै कुर्वे क्रिया इति॥१६७॥
विष्णोरंशावतारत्वं यत्कृष्णस्य त्वभाणिषुः ।
नासौ विष्णुपुराणादेराभिप्रायोऽस्ति सर्वथा ॥१६८॥
तत्र हि श्रीहरिः साक्षाद्ब्रह्मत्वेन निरूपितः ।
तस्मात्तदनुरोधेनाभिप्रायस्तस्य वर्ण्यताम् ॥१६९॥
उपक्रमोपसंहाराद्यविरोधेन सिध्यति ।
यः स शास्त्राशयः प्रोक्तो मीमांसान्यायचिन्तकैः ॥१७०॥
तस्माद्वैष्णवकेशाभ्यां जनुषी रामकृष्णयोः ।
प्रोक्ते रेतोविकारत्वाभावबोधाय वै तयोः ॥१७१॥
अंशेनावतरद्विष्णुरिति यच्चापि दृश्यते ।
तदप्यैच्छिकमूर्त्यासौ बभूवेत्यर्थकं मतम् ॥१७२॥
तथा हि व्यापको देवो देवक्या जठरे कथम् ।
स्थास्यतीत्याशयच्छित्त्यायंशेनेति समीरितम् ॥१७३॥
तथा च व्यापकोऽप्येष ऐच्छिकेन स्ववर्ष्मणा ।
परिच्छिन्नेन भगवान् संबभूवेति कथ्यते ॥१७४॥
अथाकाशपृथिव्यादेर्मानं यत्पञ्चलक्षणे ।
प्रोच्यते तदुपासार्थं विराड्रूपे परात्मनः ॥१७५॥

केवलं तस्य तात्पर्यमीशमाहात्म्यवर्णने ।
न तु तत्रोच्यते मानं पृथिव्यादेस्तु तात्त्विकम् ॥१७६॥
नन्वतात्त्विकमर्थं चेद्वक्ति शास्त्रं तदैश्वरम् ।
कथं स्यादिति चेदत्र प्रोच्यते तन्निशामय ॥१७७॥
तात्पर्येण पृथिव्यादेर्यदि मानं विवक्षितम् ।
पुराणानां भवेत्तर्हि स्याद्दोषो भवदीरितः ॥१७८॥
तत्तु नास्त्येव किं त्वेषां माहात्म्यं केवलं विभोः ।
वक्तव्यमस्ति बहुधोपासनार्थं विराट्तनोः ॥१७९॥
यथैष लक्षमुद्रावान्धनिकोऽस्तीति भाषिणम् ।
न मिथ्यावादिनं प्राहुर्धनिनो धनवर्णने ॥१८०॥
न हि तथ्यैव विज्ञाता जनैस्तल्लक्षशालिता ।
अतात्पर्यात्तु संख्यायास्तद्वचो नास्ति दोषभाक् ॥१८१॥
तथैव देवमाहात्म्यवर्णनैकपरेऽपि च ।
दोषः पुराणसंदोहे न विचारेण लक्ष्यते ॥१८२॥
अत एव पुराणानां वैमत्येऽपि परस्परम् ।
बहुधेश्वरमाहात्म्यं दोषो वर्णयतां न हि ॥१८३॥
न तावता तु सिद्धान्ताज्ञानं तेषां प्रकल्प्यताम्।
विषयाः सर्वशास्त्राणां दृश्यन्ते पञ्चलक्षणे ॥१८४॥
भवतां च मतेऽप्यस्ति शास्त्रविद्याविपर्ययः ।
शास्त्रे तु भानोर्विद्यायां पृथिव्या गतिरिष्यते ॥१८५॥

ततश्च भवतां पूर्वेऽप्यज्ञाः शास्त्रकृतोऽभवन् ।
पश्चात्सुबुद्धयो जाता इति शङ्का भवेन्न किम् ॥ १८६ ॥
अथ शास्त्रेषु विहिता यास्तु विप्रादिजातयः ।
उच्यते तासु दोषश्चेदिदमत्राभिदध्महे ॥ १८७ ॥
पूर्वजन्मकृतैः पुण्यपापैरुत्तरजन्मनि ।
नानाफलानि भुज्यन्ते प्राणिभिः सकलैरपि ॥ १८८ ॥
केचित्तु नेत्रविकला बधिराः पङ्गवोऽपरे ।
केचित्सुरूपा बलिनो धनिनो बुद्धिशालिनः ॥ १८९ ॥
केचिद्विवेकिनः शान्ताः केचिन्मूढा अमर्षिणः ।
एवं हि दृश्यते नानाविधः कर्मफलोदयः ॥ १९० ॥
तथैव कर्मणा प्राचा ब्राह्मणाद्याश्च जातयः ।
लभ्यन्ते प्राणिभिस्त्वेतच्छास्त्रदृष्टं न चान्यथा ॥ १९१ ॥
शास्त्रं हि दृष्टिरस्माकं तेनादृष्टं समीक्ष्यते ।
तच्च युक्त्याभिसंपन्नं को न मन्येत बुद्धिमान् ॥ १९२ ॥
न हि तुल्यस्वभावत्वान्न्यूनत्वाद्वा गुणैरपि ।
विप्राः स्युरितरैस्तुल्या न्यूना वापि कथञ्चन ॥ १९३ ॥
अपि भूरिगुणैर्युक्तो भृत्यस्तुल्योऽपि वा गुणैः ।
न जातु धरणीपालपदवीं भोक्तुमर्हति ॥ १९४ ॥
एषैव पदवी ब्राह्मी कृतपुण्यैरुपार्जिता ।
यदादेशात्परेशस्य यज्ञादीन्कर्तुमर्हति ॥ १९५ ॥

अथ याः स्मृतयः काश्चिन्निन्द्यास्त्यक्ताश्च वैदिकैः ।
पापिनां दण्डभोगार्थमीशस्ता उदपादयत् ॥१९६॥
अवश्यं पापिनां दण्डो भवतामपि संमतः ।
तथैव तेषां दण्डार्थं कदध्वानः कृता इमे ॥१९७॥
तथा हि ये नराः पापा रोचयन्ते त एव ताः ।
बह्वनर्थावहाल्पेष्टदायिकर्मसु लोलुपाः ॥१९८॥
धूर्ता दोषयुताचाररता मलिनबुद्धयः ।
पुनः पुनर्भगवता पात्यन्ते नरकेऽशुचौ ॥१९९॥
तथा हि शास्त्रद्वारैतद्व्यक्तं बोधयतीश्वरः ।
दुष्टानां दण्डदानार्थं स्मृतयस्ताः कृता इति ॥२००॥
अत एव हि ये पुण्यकर्माणः श्रद्धया युताः ।
न ताः स्मृतीस्ते मन्यन्ते संमतेशानुशासनाः॥२०१॥
तस्माच्छुद्धतमं शास्त्रं वैदिकं मङ्गलावहम् ।
क्षुद्रबुद्धिसमुद्भूतैर्न त्याज्यं दोषसंशयैः ॥२०२॥

इति षष्ठस्याध्यायस्य पूर्वार्धम्[1] ।

---

१ अत उत्तरं 'समाप्तम्' इत्यधिकं त्रिष्वपि अ आ इ पुस्तकेषु.

(उत्तरार्धम्)

वेदान्तादिषु ये प्रोक्ता दोषाभासाः स्वया धिया।
तेषूक्तान्येव भूयांसि समाधानानि सूरिभिः ॥ १ ॥
नृणामत्यल्पबुद्धित्वात्सूक्ष्मगम्भीरवस्तुनि ।
भवन्ति संशयाः पुंसां तद्धि तस्यास्ति भूषणम् ॥ २ ॥
किं तु नानाविधाक्षेपसमाधानादिलेखने ।
इहापद्येत सर्वेषां ग्रन्थानामपि लेखनम् ॥ ३ ॥
उपादानत्वमीशस्य तदभेदं जगत्यपि ।
ब्रुवन्वेदान्तसिद्धान्तो नेशे वदति दूषणम् ॥ ४ ॥
पत्रे कज्जलरेखायाः पुमाकारेण लेखने ।
पत्रं च तदवच्छिन्नं पुमाकारेण भासते ॥ ५ ॥
प्रकृतेर्नामरूपाभ्यां स्वसत्तानुगमेन च ।
जीवकर्मवशादीशो जगद्रूपवभासते ॥ ६ ॥
रेखैव पुंव्यवहृतौ केवलं कारणं मता ।
अधिष्ठानतया पत्रं तत्रोपकुरुते यथा ॥ ७ ॥
जगद्रूपवहतौ हेतू प्राकृते नामरूपके ।
अधिष्ठानतया ब्रह्म तस्योपादानमुच्यते ॥ ८ ॥
या तावत्पुरुषे सत्ता पत्रस्यैव हि सा स्मृता।
रेखाकृतं तु तद्रूपं यत्र दोषस्य संभवः ॥ ९ ॥
सत्ता चैतन्यमानन्दस्त्रितयं ब्राह्ममुच्यते ।
प्राकृते नामरूपे तु सर्वे दोषास्तदाश्रयाः ॥ १० ॥

न सत्तायां न चानन्दे ज्ञाने वा दोषसंभवः ।
दोषा जगति यावन्तो नामरूपगता हि ते ॥ ११ ॥
रेखालेखनदोषेण पुमानङ्गेन केनचित् ।
दुष्टोऽपि च न तत्पत्रं दुष्टतां लभते यथा ॥ १२ ॥
तथा सच्चिन्मयवपुर्विश्वाधिष्ठान एव सन् ।
नामरूपगतैर्दोषैर्नेश्वरोऽप्वपि लिप्यते ॥ १३ ॥
न तद्विक्रियते पत्रं भासमानं च पुंस्तया ।
रेखया किं तु पुरुषव्यवहारास्पदीकृतम् ॥ १४ ॥
तथा जीवादृष्टवशात्प्राकृतैर्नामरूपकैः ।
जगद्भद्भासमानेऽपि नेशे सूक्ष्मापि विक्रिया ॥ १५ ॥
पादोऽस्य सर्वभूतानि[1] पादत्रयमथामृतम् ।
अस्यैकांशो जीववर्ग इति शास्त्रेषु गीयते ॥ १६ ॥
निरंशे वस्तुतो ब्रह्मण्यौपाधिक्यंशकल्पना ।
निरंशेऽपि यथा व्योम्नि घटाकाशादिकल्पना ॥ १७ ॥
न तावत्पुरुषः पत्राद्विद्यतेऽथापि पत्रकम् ।
न दुष्टं नापि विकृतं स्वरूपान्नाणु हीयते ॥ १८ ॥
तथेशात्स्वाश्रयाद्विश्वं यद्यपीदं न भिद्यते ।
न दुष्टो नापि विकृतः स्वरूपादच्युतो हरिः ॥ १९ ॥
यथा रेखागता दोषा दूषयन्तोऽपि पूरुषम् ।
नोत्पादयन्ति विकृतिं पत्रे रूपविवर्जिते ॥ २० ॥

---

१ 'सर्वभूपानि'—आ इ.

नामरूपगता दोषा दूषयन्तोऽपि वै जगत् ।
नोत्पादयन्ति विकृतिं चिदानन्दमये हरौ ॥ २१ ॥
धर्माधर्मविपाको यः सोऽदृष्टमिति भाष्यते ।
तौ च देहाभिमानोत्थौ स चाज्ञानप्रकल्पितः ॥ २२ ॥
यथा प्रकाशतमसोर्विरोधः सुमहान् स्थितः ।
तथा चिदात्मदेहाद्योः स्फुटात्यन्तविरोधिता ॥ २३ ॥
तमस्तुल्यप्रभावं हि देहादि सकलं जडम् ।
तेजस्तुल्यस्वभावो वा आत्मासौ चिन्मयो यतः ॥ २४ ॥
तथापि देह आत्मत्वमध्यस्यात्मनि देहताम् ।
अविवेकाच्चिदचितोर्ममाहमिति मन्यते ॥ २५ ॥
ततो देहाद्यहङ्कारात्सुखादौ जायते स्पृहा ।
तत इष्टानिष्टयोगवियोगार्थं प्रवर्तते ॥ २६ ॥
साहङ्कारप्रवृत्तेश्च धर्माधर्माभिसंभवः ।
ततश्च सुखदुःखादि तथा तत्साधनं जगत् ॥ २७ ॥
नेश्वरः स्वोपभोगार्थं जगत्सृजति लोकवत् ।
किं तु तत्तत्कर्मवशादिति प्राक्प्रतिपादितम् ॥ २८ ॥
यस्य यस्य यथा कर्म न्याय्यं[1] तस्य तथा फलम्।
न[2] युष्मन्मतवत्त्वत्र भोगेच्छा कल्प्यते विभौ ॥ २९ ॥

---

१ 'न्यायं'— अ.

२ आ इ पुस्तकयोः 'न तु युष्मन्मत इव' इति पाठः प्रागासीद्यः पश्चात्संशोध्य 'न युष्मन्मतवत्त्वत्र' इति विहितो दृश्यते.

मिथ्याज्ञानादभिमतिः साहङ्कारः प्रवर्तते ।
धर्माधर्मौ ततः स्यातां तद्भोगार्थमिदं जगत् ॥ ३० ॥
क्व चात्मा चित्स्वभावोऽसौ क्व देहादि जडं तयोः ।
वैलक्षण्यं महदिति विवेकाभ्याससंपदा ॥ ३१ ॥
दुःखाद्या देहगा धर्मा आत्मैभ्यो व्यतिरिच्यते ।
न मे कश्चिन्न मेऽत्रार्थ इति ज्ञात्वा विमुच्यते ॥ ३२ ॥
अभिमानोद्भवं दुःखं सर्वेषामानुभाविकम् ।
तन्निरासात्तन्निरास इत्यपि प्राङ् निरूपितम् ॥ ३३ ॥
धर्माधर्मौ सुखं दुःखं सर्वे देहादिगा गुणाः ।
यस्यैवं वास्तवो बोधो धर्माद्यैर्न स लिप्यते ॥ ३४ ॥
सुखदुःखाभिलाषी यो धर्माधर्मसुनिःस्पृहः ।
स मिथ्याज्ञानवान्धूतो बध्यते स्वेन कर्मणा ॥ ३५ ॥
अत एव हि लोकेऽस्मिन् ज्ञानी परमदुर्लभः ।
ईशस्य परया भक्त्या लभ्यते तत्कृपावशात् ॥ ३६ ॥
अत एकान्तभावेन जगतां पतिरच्युतः ।
उपासनीयः पुरुषैः स हि ज्ञानं प्रयच्छति ॥ ३७ ॥
अनाद्यविद्याप्रच्छन्नबोधानां प्राणिनामिह ।
गोविन्दभजनादन्यच्छरणं नास्ति किञ्चन ॥ ३८ ॥
[1]अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ ३९ ॥

---

१ आ इ पुस्तकयोरस्य श्लोकस्य स्थाने 'अनाद्यविद्यासुप्तोऽयं प्रबोधं याति वै यदा । तदात्मानमजं ज्ञात्वा सर्वबन्धात्प्रमुच्यते ॥' इति श्लोकः प्रागासीद्यः पश्चादुपरितनपाठवच्छ्लोकेन निरस्तो दृश्यते.

न चेशो भ्रामयत्यस्मानुदासीनतया स्थितः ।
स्वाज्ञानेनैव मुह्यामो न यावत्तत्त्वदर्शनम् ॥ ४० ॥
प्रत्युतेशो बोधयति वाक्यैर्वेदमयैर्निजैः ।
देहाभिमानं मा कार्षीस्तस्मात्त्वं ह्यतिरिच्यसे ॥ ४१ ॥
नन्वज्ञानमथो बन्धो भवतः कस्य तद्वद ।
ब्रह्मणश्चेत्परं ब्रह्म कथं बन्धेन युज्यते ॥ ४२ ॥

उच्यते—

नाज्ञानं नापि वा बन्धो ब्रह्मदृष्ट्यास्ति कर्हिचित् ।
नित्यशुद्धं नित्यबुद्धं नित्यमुक्तं च तत्स्थितम् ॥ ४३ ॥
जीवदृष्ट्या त्वसौ बन्धश्चिज्जडाध्याससंभवः ।
अवास्तवस्त्वसौ यस्मान्मिथ्याज्ञानप्रकल्पितः ॥ ४४ ॥
विरुद्धश्चिन्मयो ह्यात्मा देहादिजडसंघतः ।
तयोः परस्पराध्यासे मिथ्यात्वमुचितं भ्रमे ॥ ४५ ॥
यथा प्रकाशतमसोर्विरोधः सुमहान् स्थितः ।
तथा चिदात्मदेहाधोः स्फुटात्यन्तविरोधिता ॥ ४६ ॥
यथा मिथोगुणाध्यासः प्रकाशतमसोर्मृषा ।
तथा मिथोगुणाध्यासश्चिदात्मजडयोर्मृषा ॥ ४७ ॥
प्रकाशे श्यामताबुद्धिस्तमस्युज्ज्वलतादिधीः ।
यथा मृषात्मनि तथा कार्श्यं दुःखादिधीर्भ्रमः ॥ ४८ ॥
भ्रमजन्यस्य बन्धस्य मिथ्यात्वमपि निश्चितम् ।
भ्रान्तदृष्ट्या त्वसौ सत्योऽभ्रान्तदृष्ट्या मृषैव सः ॥ ४९ ॥

स्वप्नीयदुःखं चौर्यं च तद्दण्डादिकमेव च ।
सत्यं स्वप्नगदृष्ट्या तु जाग्रद्दृष्ट्या मृषैव तत् ॥ ५० ॥
जीवदृष्ट्या तथा बन्धो धर्माधर्मौ सुखासुखे ।
ब्रह्मदृष्ट्या तु तत्सर्वं जीवेन सहितं मृषा ॥ ५१ ॥
स्वप्ने दुःखं यथा प्राप्तं किल्बिषं वा कृतं बहु ।
सर्वस्य तस्य मिथ्यात्वात् पुमांस्तेन न लिप्यते ॥ ५२ ॥
तथा जीवकृतैर्दोषैः सुखैर्दुःखैश्च तद्गतैः ।
तेषां स्वदृष्ट्या मिथ्यात्वान्नेश्वरोऽप्यपि लिप्यते ॥ ५३ ॥
जीवस्तु सुखदुःखादि धर्माधर्मौ तथार्हति ।
मृषापि सद्यथा स्वप्ने सुखदुःखादि भुज्यते ॥ ५४ ॥
स्वप्नेऽपराधं कुर्वाणः परेषां ताड्यते च तैः ।
दुःखं च तस्मादाप्नोति मिथ्यात्वेऽप्यखिलस्य च ॥ ५५ ॥
तथात्मभावं देहादावध्यस्यात्मनि देहताम् ।
अविवेकाच्चिदचितोर्ममाहमिति मन्यते ॥ ५६ ॥
अनाद्यविद्यया त्वेवं जीवो मोहमुपागतः ।
धर्माधर्मौ सुखं दुःखमा प्रबोधाद्व्रजत्यसौ ॥ ५७ ॥
[1]अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमात्मानं बुध्यते तदा ॥ ५८ ॥

---

१ अत्रापि आ इ पुस्तकयोः " अनाद्यविद्यासुप्तोऽयं प्रबोधं याति वै यदा । तदात्मानमज ज्ञात्वा सर्वबन्धात्प्रमुच्यते ॥ " इति श्लोकः प्राग्लिखितः पश्चादुपरितनश्लोकन निरस्तश्च दृश्यते.

ननु जीवस्य किं रूपमीशाद्भिन्नोऽस्त्ययं न वा ।
भेदे सिद्धान्तहानिः स्यादभेदे त्वीशदूषणम् ॥ ५९ ॥
अत्रोच्यते—
स्वप्ने य एष पुरुषो भ्रमन्[1]भवति दुःखभाक् ।
सुखं शयानाच्छय्यायां न हि तावद्विभिद्यते ॥ ६० ॥
अभेदेऽपि स्वप्नगतैर्दोषैर्जाग्रन्न लिप्यते ।
विलासायैव ते तस्य स्वप्नगस्तु प्रबाध्यते ॥ ६१ ॥
स्वप्ने स्तेयादि कुर्वाणस्ताड्यते च तथा परैः ।
न तेन जाग्रत्पापीयान् स्वप्नगस्तु प्रबाध्यते ॥ ६२ ॥
यत्पापाचरणं स्वप्ने दुःखभोगश्च पुष्कलः ।
जाग्रद्दृष्ट्या विलासोऽसौ स्वप्नगस्तु प्रबाध्यते ॥ ६३ ॥
जाग्रत्स्वप्नगयोर्भेदो वस्तुतो न तथापि तु ।
विलासमात्रं तद्दृष्ट्या[2] तद्दोषैर्न तु लिप्यते ॥ ६४ ॥
ईशदृष्ट्या प्रपञ्चोऽयं विलासायैव केवलम् ।
न दोषैर्लिप्यतेऽत्रत्यैः सोऽस्य साक्ष्येव संस्मृतः ॥ ६५ ॥
स्वैकांशकल्पितं विश्वं पश्यन्साक्षितया स्थितः ।
न स्वस्वरूपाच्च्यवते ह्यनन्तमहिमा विभुः ॥ ६६ ॥
पादोऽस्य सर्वभूतानि पादत्रयमथामृतम् ।
अस्यैकांशो जीववर्ग इति शास्त्रेषु गीयते ॥ ६७ ॥

---

१ 'भ्रवन्' इति भ्रान्तः पाठः आ इ पुस्तकयोः.

२ 'तद्दृष्ट्या'—आ.

निरंशे वस्तुतो ब्रह्मण्यौपाधिक्यंशकल्पना ।
निरंशेऽपि यथा व्योम्नि घटाकाशादिकल्पना ॥ ६८ ॥
कवीनामपि वै प्राचामतर्क्यो महिमा हरेः ।
क उत्कर्षो भवेत्तस्य यद्यस्मद्बुद्धिगोचरः ॥ ६९ ॥
ईशदृष्ट्या विलासोऽसौ यज्जीवैरिह भुज्यते ।
जाग्रद्दृष्ट्या विलासो हि भुज्यते स्वप्नगेन यत् ॥ ७० ॥
अखिलैर्जीवगैर्धर्मैर्नेश्वरोऽप्वपि लिप्यते ।
तस्य दृष्ट्या मृषा ते हि नित्यबुद्धस्वभाविनः ॥ ७१ ॥
नित्यबुद्धस्वरूपस्य दृष्ट्या भगवतस्त्विमे ।
मृषैव जीवगा दोषाः स वै साक्षितया स्थितः ॥ ७२ ॥
जीवदृष्ट्या त्विमे सत्या यथा स्वप्नगतः पुमान् ।
क्लिश्यति स्वप्नगैर्दुःखैर्यतते च निवारणे ॥ ७३ ॥
यतितव्यं ततोऽवश्यमात्मबन्धविमुक्तये ।
मिथ्याभिमानजं दुःखं विवेकात्सुखमश्नुते ॥ ७४ ॥
एतेन प्राणिनां बन्धः कल्पितो यद्यवास्तवः ।
किमर्था तर्हि तन्मुक्तिरित्युक्तिरपि खण्डिता ॥ ७५ ॥
स्वप्नानुभूतदुःखानामसतामपि वस्तुतः ।
बोधान्निवृत्तिः संजाता किं सुखाय न कल्प्यते[1] ॥ ७६ ॥
पाप्मना लभते दुःखं पुण्येन लभते सुखम् ।
विवेकपूर्वकाज्ज्ञानात् सर्वबन्धात्प्रमुच्यते ॥ ७७ ॥

---

१ 'कल्पते'–अ आ.

कल्पितं खलु जीवत्वं तत्त्वज्ञानेन नश्यति ।
ततश्चोपाधिनाशेन स्वस्वरूपेऽवतिष्ठते ॥ ७८ ॥
एतेनेश्वरसारूप्यं जीवानां मुक्तिरस्ति चेत् ।
भवेद् वृद्धिर्विकारश्चेश्वरस्येत्यपि खण्डितम् ॥ ७९ ॥
अनाद्यविद्यया युक्तो जीवो भ्रमति संसृतौ ।
अविद्योपाधिनाशे तु स्वरूपमवशिष्यते ॥ ८० ॥
यच्चोक्तं ज्ञानिनः पुंसोऽहङ्कृतिर्जायते ध्रुवम् ।
वचस्तदप्यहं मन्ये नभःपङ्कजवाक्यवत् ॥ ८१ ॥
गतदेहाद्यभिमतेः केवलं ब्रह्म पश्यतः ।
ज्ञानिनोऽहङ्कृतिरिति वचः स्यात्कथमर्थवत् ॥ ८२ ॥
गतदेहाद्यभिमतिर्यः स ज्ञानीति कथ्यते ।
अहन्ता यस्य नक्षीणा ज्ञानित्वं तस्य वा कथम् ॥ ८३ ॥
अत एवोच्यते लोके ज्ञानी परमदुर्लभः ।
तद्दीशकरुणालभ्यमतः सेव्यः सदा हरिः ॥ ८४ ॥
त्यक्तान्यभानः सर्वत्र हरिमेकं यदेक्षते ।
तदा तं ज्ञानिनं प्राहुः का तत्राहङ्कृतेः कथा ॥ ८५ ॥

---

१ अत आरभ्य त्रयाणा श्लोकार्धाना स्थाने 'ये तु ज्ञानवदाभासास्तेषा स्यात्तादृशी स्थितिः ।' इत्येक एव श्लोकार्धः प्रागासीत् आ पुस्तके यः पश्चादिदानीन्तनपाठेन निरस्तो दृश्यते.

२ आ इ पुस्तकयोः '० लभ्यं तदुपास्यः सदा हरिः' इति पाठः प्राग्लिखितः पश्चादुपरितनपाठेन निरस्तश्च दृश्यते.

भवन्मतं च जीवांहोदण्डं स्रष्टोऽग्रहीत्स्वयम्।
तस्मिन्विश्वासमात्रेण मुच्यन्ते पातकादिति ॥ ८६ ॥
ततः स्रष्टे सुविश्वस्य केचित्पातकलोलुपाः ।
कुर्युः पापमसौ दोषः प्रत्युतास्ति भवन्मते ॥ ८७ ॥
सर्वशुद्धतमं तस्मादिदं वेदान्तदर्शनम् ।
दोषलेशोऽपि नेहास्ति किं त्वग्राह्यमसद्धियाम्॥ ८८ ॥
नित्यशुद्धो नित्यबुद्धो नित्यमुक्तश्च वै विभुः।
अकामोऽव्यसनी चैव वेदान्तेष्वेव कथ्यते ॥ ८९ ॥
किं चात्र विषये किञ्चिदन्यदप्युच्यते वचः ।
यथा वेदान्तनैर्मल्यं दोषश्चास्ति मतान्तरे ॥ ९० ॥
दोषदुःखयुताञ्जीवान् स्वोपभोगार्थमीश्वरः ।
तेषां दुःखान्यगणयन् सृजतीति भवन्मतम् ॥ ९१ ॥
स्वैकांशेन तथा भूत्वा क्रीडतीति मतं तु नः।
भवन्मतान्मतेऽस्माकं विषयेऽस्मिन्न गौणता ॥ ९२ ॥
उत्पादको यश्चोराणां स्वयं चोरश्च यो भवेत् ।
किं तारतम्यमुभयोर्विचारे सति सिध्यति ॥ ९३ ॥
किं तु युष्मन्मते सत्यं दुःखं दोषाश्च वै यतः।
दुष्टोत्पादकता सत्या विभौ क्लृप्ता भवन्मते ॥ ९४ ॥
अस्माकं तु मते दुःखं दोषाश्च भ्रान्तिजा यतः।
भ्रान्तदृष्टयैव ते सत्या ब्रह्मदृष्ट्या मृषैव हि ॥ ९५ ॥

१ 'ईशो' इति प्राक्तनः पञ्चान्निरस्तश्च पाठः आ पुस्तके.

अभ्रान्तं हि परं ब्रह्म तद्दृष्ट्यैते मृषा ततः।
अस्माकं दुष्टता मिथ्या विशेषोऽस्मन्मते त्वियान् ॥ ९६ ॥
विरुद्धश्चिन्मयो ह्यात्मा देहादिजडसंघतः ।
तयोः परस्पराध्यासे मिथ्यात्वमुचितं भ्रमे ॥ ९७ ॥
भ्रमजन्यस्य बन्धस्य मिथ्यात्वमपि निश्चितम्।
भ्रान्तदृष्ट्या त्वसौ सत्योऽभ्रान्तदृष्ट्या मृषैव सः॥ ९८ ॥
स्वप्नीयदुःखं चौर्यं च तद्दण्डादिकमेव च ।
सत्यं स्वप्नगदृष्ट्यैव जाग्रद्दृष्ट्या मृषैव हि ॥ ९९ ॥
जीवत्वं जीवदोषाश्च ब्रह्मदृष्ट्या मृषैव हि ।
नित्यबुद्धतया तच्च स्वे महिम्न्येव तिष्ठति ॥१००॥
चोरोत्पादकता सत्या विभौ क्लृप्ता भवन्मते ।
अस्माकं चोरता मिथ्या विशेषोऽस्मन्मते त्वियान्॥१०१॥
दुष्टोत्पादकता सत्या विभौ क्लृप्ता भवन्मते ।
अस्माकं दुष्टता मिथ्या विशेषोऽस्मन्मते त्वियान्॥१०२॥
जीवत्वं जीवदोषाश्च भ्रान्तदृष्ट्यैव केवलम् ।
ब्रह्मदृष्ट्या न सन्त्येव तद्दोषैर्नैव लिप्यते ॥१०३॥
ननु दुष्टान्नरानीशः सृजतीति न नो मतम् ।
नृणामेवेश्वरः कर्ता दोषा जीवकृता मताः ॥१०४॥
अत्रोच्यते—
भूतभव्यभवज्ज्ञाता परमात्मा यतो मतः ।
ज्ञातवानेव जीवानां भविष्यद्दोषशालिताम् ॥१०५॥

मत्सृष्टेषु भविष्यन्ति खल्वेते दोषशालिनः ।
ततोऽतिदुःखिनश्चेति जानात्येव किलेश्वरः ॥१०६॥
इति जानन्नपीशस्तान् सृजत्येवेति वल्गताम् ।
अनपोह्या व्यसनिता दुष्टोत्पादकतापि च ॥१०७॥
सदोषान्यदि नास्राक्षीद्भाविदोषांस्तथापि नून् ।
जानन्नपि यतोऽस्राक्षीद् दुष्टानेव ततोऽसृजत्॥१०८॥
अजानन्नस्वतन्त्रश्च पिता पुत्रान्सृजन्नपि ।
कालेन तेषां दुष्टत्वे न स दुष्यति तावता ॥१०९॥
स्वतन्त्रोऽप्येष भगवान् भविष्यद्दोषशालिताम् ।
नृणां ज्ञात्वापि तान्कुर्वन् दुष्टोत्पादक एव सः ॥११०॥
इममर्थं सृजाम्यस्माद्दोषोऽपि भविता महान् ।
इति जानन्नपि स्रष्टा दुष्टस्रष्टा कथं न सः ॥१११॥
ईशः शर्मेच्छया जीवान्सृजतीति तु वादिनः ।
मोघेच्छत्वमथाज्ञत्वं कल्पयन्ति परात्मनि ॥११२॥
किं च शुद्धानेव नरान्यद्युत्पादयतीश्वरः ।
शुद्धानां दुष्टता हन्त कथं कालेन जायते ॥११३॥
नरास्तद्बुद्धयश्चैव शुद्धा एव कृता यदि ।
कथं दुष्यन्ति कालेन धीश्च पापे प्रवर्तते ॥११४॥
यदि शुद्धधियां पापरतिः कालेन जायते ।
स्वर्गता अपि कालेन भजेयुर्दुष्टतां तदा ॥११५॥

दुष्टबुद्धींश्च दुष्टांश्च तस्मात्सृजति नृन्विभुः ।
अप्रार्थितमपि ह्येतद् भवच्छास्त्रेण सिध्यति ॥११६॥
एवमन्येऽपि बहवो दोषाः सन्ति भवन्मते ।
इह द्वितीयेऽध्याये च केचित्तेषु प्रदर्शिताः ॥११७॥
किं च दुःखाकुलाञ्जीवान्सृजतीति तु दूषणम् ।
स्फुटमेव भवच्छास्त्रे जन्मतोऽन्धादिदर्शनात् ॥११८॥
तस्माद्दोषादियुक्तान्नृन्सृजतीति भवन्मतात् ।
स्वैकांशेन तथा भूत्वा क्रीडतीत्यत्र का क्षतिः ॥११९॥
उत्पादको यश्चोराणां स्वयं चोरश्च यो भवेत् ।
किं तारतम्यमुभयोर्विचारे सति सिध्यति ॥१२०॥
किं तु युष्मन्मते जीवा दोषा अपि च तद्गताः ।
सत्या एवेशदृष्ट्यापि तेषां दुःखादिकं च यत् ॥१२१॥
ततो भवन्मते दोषा बहवः प्राङ् निरूपिताः ।
नैर्घृण्यप्रमुखा ईशे क्लृप्ता इति विशिष्यते ॥१२२॥
नास्मन्मते तु ते दोषास्तदृष्ट्यास्य मृषात्वतः ।
किं च प्रारब्धतन्त्रत्वं दुःखादीनां यतो मतम् ॥१२३॥
जीवत्वं जीवदोषाश्च ब्रह्मदृष्ट्या मृषैव हि ।
नित्यबुद्धतया तच्च स्वे महिम्न्येव तिष्ठति ॥१२४॥
चोरोत्पादकता सत्या विभौ क्लृप्ता भवन्मते ।
अस्माकं चोरता मिथ्या तस्मादस्मन्मतं वरम् ॥१२५॥

दुष्टोत्पादकता सत्या विभौ क्लृप्ता भवन्मते।
अस्माकं दुष्टता मिथ्या तस्मादस्मन्मतं वरम् ॥१२६॥
जीवत्वं जीवदोषाश्च भ्रान्तदृष्ट्यैव केवलम्।
ब्रह्मदृष्ट्या न सन्त्येव तद्दोषैर्नैव लिप्यते ॥१२७॥
विरुद्धश्चिन्मयो ह्यात्मा देहादिजडसंघतः ।
तयोः परस्पराध्यासे मिथ्यात्वमुचितं भ्रमे ॥१२८।
भ्रमजन्यस्य बन्धस्य मिथ्यात्वमपि निश्चितम्।
यथा स्वप्ने कृतं चौर्यं तद्दण्डाद्यपि वै मृषा ॥१२९॥
यत्पापाचरणं स्वप्ने दुःखभोगश्च पुष्कलः ।
जाग्रद्दृष्ट्या विलासोऽसौ स्वप्नगस्तु प्रबाध्यते ॥१३०॥
जाग्रत्स्वप्नगयोर्भेदो वस्तुतो न तथापि तु ।
विलासमात्रं तद्दृष्ट्या तद्दोषैर्न तु लिप्यते ॥१३१॥
ईशदृष्ट्या प्रपञ्चोऽयं विलासायैव केवलम् ।
न दोषैर्लिप्यतेऽत्रत्यैः सोऽस्य साक्ष्येव संस्मृतः ॥१३२॥
स्वैकांशकल्पितं विश्वं पश्यन्साक्षितया स्थितः।
न स्वस्वरूपाच्च्यवते ह्यनन्तमहिमा विभुः ॥१३३॥
पादोऽस्य सर्वभूतानि पादत्रयमथामृतम् ।
अस्यैकांशो जीववर्ग इति शास्त्रेषु गीयते ॥१३४॥
निरंशे वस्तुतो ब्रह्मण्यौपाधिक्यंशकल्पना ।
निरंशेऽपि यथा व्योम्नि घटाकाशादिकल्पना ॥१३५॥

कवीनामपि वै प्राचामतर्क्यो महिमा हरेः ।
क उत्कर्षो भवेत्तस्य यद्यस्मद्बुद्धिगोचरः ॥ १३६ ॥
ईशदृष्ट्या विलासोऽसौ यज्जीवैरिह भुज्यते ।
जाग्रद्दृष्ट्या विलासो हि भुज्यते स्वप्नगेन यत् ॥ १३७ ॥
अखिलैर्जीवगैर्धर्मैर्नैश्चगेऽण्वपि लिप्यते ।
तस्य दृष्ट्या मृषा ते हि नित्यबुद्धस्वभाविनः ॥ १३८ ॥
नित्यबुद्धस्वरूपस्य दृष्ट्या भगवतस्त्विमे ।
मृषैव जीवगा धर्मा न स तैर्लिप्यते क्वचित् ॥ १३९ ॥
नित्यशुद्धो नित्यबुद्धो नित्यमुक्तश्च वै विभुः ।
अकामोऽव्यसनी चैव वेदान्तेष्वेव कथ्यते ॥ १४० ॥
नरैः संसारिभिस्तुल्यः सृजतीशोऽपि वै प्रजाः ।
इति प्रवदतां पक्षे बहुदोषाः प्रदर्शिताः ॥ १४१ ॥
भवद्भिरैश्वरं कृत्यं तर्क्यमाणं स्वया धिया ।
समीकृतं नृणां कृत्यैर्ननु दोषाकुलीकृतम् ॥ १४२ ॥
अस्माभिर्नित्यतृप्तस्य निर्विकारस्य वै हरेः ।
मायाया अप्रतर्क्याया विलासः कश्चिदिष्यते ॥ १४३ ॥
च्युतते वाच्युतस्यापि गुणिते वागुणस्य च ।
अतर्क्यानन्तशक्तेर्हि स्थाने तदिति मन्महे ॥ १४४ ॥
अच्छित्त्वैव यथात्मानमीशो त्रैविध्यमुच्यते ।
तथाप्यहीनमेकत्वं तद्वदस्याप्यतर्क्यता ॥ १४५ ॥

---

१ एतदादिश्लोकाष्टकम् आ पुस्तके पश्चिमशोधरूपेण लिखितं दृश्यते.

अग्राह्यो यत्कुबुद्धीनां मुह्यतीव च यन्मनः ।
अतर्क्येशमहिम्नोऽसौ न भारः किं तु भूषणम् ॥ १४६ ॥
भेदबुद्ध्या भगवतः कुर्वतामप्युपासनाम् ।
स्वर्गादिस्वसु चार्थित्वात् स्वार्था सा भक्तिरुच्यते ॥ १४७ ॥
ईशांशभावनायुक्ता ईश्वरं य उपासते ।
अन्ते ईशैक्यताप्राप्तेस्तानीशैकरतान्विदुः ॥ १४८ ॥
तस्मादीशस्य माहात्म्यं यथा वेदान्तदर्शने ।
अत्यन्तनिर्मलं शुद्धं न तथान्यत्र वर्ण्यते ॥ १४९ ॥
एकः शुद्धः परात्मैव वैषम्यादिमलोज्झितः ।
न चात्रेशस्य भोगेच्छानन्दरूपस्य कथ्यते ॥ १५० ॥
अवाप्तकाम ईशोऽत्र कथ्यते व्यसनोज्झितः ।
पारमार्थिकरूपेण व्यवहारदृशा त्वथ ॥ १५१ ॥
तत्तत्कर्मानुसारेण स्वमायाशक्तिसंयुतः ।
सर्वस्रष्टाखिलेशानो भगवान्प्रतिपाद्यते ॥ १५२ ॥
तस्मादीशस्य महिमा यादृगस्मिन्मते स्थितः ।
न तथा दृश्यतेऽन्यस्मिन्बहुदोषावहे मते ॥ १५३ ॥

---

१ अत्र अ पुस्तकस्था टिप्पणी– "द्वैतसमयेषु हि परमात्मनो भूयो गुणदारिद्र्यमाप्नोति, इह तु अज्ञत्वं विज्ञत्वं सर्वज्ञत्वं निर्गुणता सगुणता निःसीमगुणता अनैश्वर्यमैश्वर्यं सर्वैश्वर्यमित्यादि सर्वं सुसपन्नम् । नन्वज्ञत्वादीना दोषाणा किमिति श्लाघ्या सपत्तिः ?— शृणु । सापेक्षा हि गुणता दोषता च भावानां, सर्वसमश्च परमात्मा न दोषाणामपेक्षावधिर्न गुणानामिति सर्वमिदं तस्यैश्वर्यमिति श्लाघ्या तद्वत्ता तस्य । स चैष व्यवहार एव । परमार्थतस्तु अज्ञत्वादिसर्वं (ज्ञ) त्वान्तं सर्वमेव कार्त्स्निकमिति नादस्तस्योत्कृष्टतामपकृष्टता वावहति । यथा दारुमयः सिंहः सहोदरो वा न साध्वसस्य न वा प्रेम्णः, तद्वत् । " इति.

ननु चेन्मायया देवः सृजत्येतच्चराचरम् ।
अन्यसाहाय्यतस्तस्माद्धीयेत महिमा विभोः ॥ १५४ ॥
मैवम्—
विष्णोरेव हि सा शक्तिर्यासौ मायेति भाष्यते ।
हीयते नैव माहात्म्यं स्वकार्यं कुर्वतस्तया ॥ १५५ ॥
अन्यथा परमेशोऽयं रक्षत्यन्नादिना प्रजाः ।
इति प्रवदतां शास्त्रं दुष्येत भवतां न किम् ॥ १५६ ॥
आत्मीयेन प्रभावेन न किं शक्नोति रक्षितुम् ।
यदन्नाद्यै रक्षतीति स्याच्छङ्का भवतामपि ॥ १५७ ॥
एवं तत्त्वस्य सूक्ष्मत्वाज्जायन्ते बहुसंशयाः ।
समाधानं तु सर्वेषां शास्त्रग्रन्थेषु पश्यत ॥ १५८ ॥
इदमत्यन्तममलं खलु वेदान्तदर्शनम् ।
स्वबुद्धिकल्पितैर्दोषैर्न त्यक्तुं युज्यते क्वचित् ॥ १५९ ॥
गम्भीरः शास्त्रविषयो न ग्राह्योऽल्पमनीषया ।
न च दूषयितुं योग्यः स्वबुद्धिकृतनिश्चयैः ॥ १६० ॥
प्रसिद्धं सहसा बुद्धेः सूक्ष्मार्थानवबोधनम् ।
तया ज्ञायेत चेत्तत्त्वं गाम्भीर्यं नाम किं ततः ॥ १६१ ॥
आस्माकीनधियः शास्त्रतत्त्वस्य च परस्परम् ।
वैजात्यं परमं तस्माद्युज्यते संशयोद्भवः ॥ १६२ ॥
गूढमेवैश्वरं तत्त्वं सहसा चेन्न बुध्यते ।
वेदान्तस्यात्र को दोषः किमन्धैर्दूष्यते रविः ॥ १६३ ॥

नृविजातीयरूपस्य नृविजातीयसंविदः ।
अप्रतर्क्यकृते रूपं सहसा ज्ञायतां कथम् ॥ १६४ ॥
अत एकान्तभावेन जगतां पतिरच्युतः ।
उपास्यः कीर्तनीयश्च स यच्छत्यात्मसंविदम् ॥ १६५ ॥
नन्वेवं यदि वेदान्तशास्त्रमेवास्तु सत्तमम् ।
तद्विरुद्धानि काणादसाङ्ख्यादीनि न सन्ति किम्॥ १६६ ॥
मैवम्—
मन्दानां तत्त्वबोधाय शाखादिभिरिवोडुराट् ।
बहुप्रकारैरीशोऽपि साङ्ख्यादिभिरुदीर्यते ॥ १६७ ॥
शुद्धं भगवतो रूपमाह वेदान्तदर्शनम् ।
न तावता विरोधोऽस्ति प्रागेवैतन्निरूपितम् ॥ १६८ ॥
साक्षात्तु प्रापकोऽस्त्येष मार्गः शुद्धाधिकारिणाम् ।
तद्द्वारा प्रापकास्त्वन्ये मार्गा मन्दाधिकारिणाम् ॥ १६९ ॥
तस्माच्छास्त्रीयविषयानग्राह्यानल्पया धिया ।
न जातु दूषयेत्प्राज्ञः स्वस्याज्ञानं तु तर्कयेत् ॥ १७० ॥
यथार्थभगवद्रूपबोधकं दृढहेतुमत् ।
गम्भीरं च प्रसन्नं च शास्त्रमस्माकमेव हि ॥ १७१ ॥
दोषान्वदन्तु वा केचित् स्तुवन्तु यदि वापरे ।
अस्माकं तु दृढा भक्तिर्जायते वैदिके मते ॥ १७२ ॥
वेदानां भारतादेश्च वाचः प्रागल्भ्यभूषणाः ।
विभान्ति मानसेऽस्माकं श्रद्धाया जन्मभूमयः ॥ १७३ ॥

अहो मानवशास्त्रादेर्भारतादेस्तथैव च ।
वाचां प्रागल्भ्यमस्माकं हृदयान्नापसर्पति ॥ १७४ ॥
पठद्भिर्मानवं शास्त्रं भारतादिकमेव वा ।
पुरः श्वःश्रेयसस्याध्वा मूर्तिमानिव लक्ष्यते ॥ १७५ ॥
भारतादिवचोभानुः समुदेति यदा तदा ।
स्वत एव विलीयन्ते कुतर्कतमसां गणाः ॥ १७६ ॥
दृश्यन्ते बहवो ग्रन्था बह्वलङ्कारमिश्रिताः ।
तेभ्योऽपि कोऽपि महिमा भारतादेर्विशिष्यते ॥ १७७ ॥
यथा यथा भवद्भिश्च प्रोच्यते तत्र दूषणम् ।
गाम्भीर्यनिश्चयद्वारा भूयः श्रद्धा विवर्धते ॥ १७८ ॥
हन्तास्मदीयं शास्त्रं ये त्यजन्ति लघुदर्शनाः ।
दोषाभासाकुलहृदस्तेभ्यः खिद्याम्यहं भृशम् ॥ १७९ ॥
गूढतत्त्वस्य शास्त्रस्य कस्तत्त्वज्ञोऽस्त्यनीश्वरः ।
अहो साहसमस्त्येतत्तत्र दोषप्रकल्पनम् ॥ १८० ॥
नूनं प्राग्जन्मकर्मैव सदसद्बुद्धिकारणम् ।
अन्यथा स्यात्कथं नाम वैमुख्यं मङ्गलावहे ॥ १८१ ॥
शान्ताः पवित्रा मङ्गल्या हृत्प्रसादविधायिनः ।
यथा ते वैदिका धर्मा नैव सन्ति तथेतरे ॥ १८२ ॥
नमो भगवते तुभ्यं विष्णवेऽतर्क्यशक्तये ।
पवित्रे वैदिके धर्मे श्रद्धां त्वामर्थयामहे ॥ १८३ ॥

शालिवाहनशाकाब्दे रसषट्सप्तभू[1]७६६मिते।
काश्यां निष्ठामसौ प्राप्तः शास्त्रतत्त्वविनिर्णयः ॥१८४॥
अन्यासामपि सर्वासां शङ्कानामुत्तरं त्विह ।
सूक्ष्मरूपेण संदिष्टं बुध्यतां बुद्धिमत्तरैः ॥ १८५ ॥
यस्येश्वरे परा भक्तिः श्रद्धा शास्त्रे च निश्चला।
तस्यैतेऽर्थाः प्रकाशन्ते इह प्रोक्ता महात्मनः ॥ १८६ ॥

इति षष्ठस्याध्यायस्योत्तरार्धम् ।

इति नीलकण्ठस्य कृतौ शास्त्रतत्त्वविनिर्णये स्वमतदोषा-
शङ्कानिराकरणं नाम षष्ठोऽध्यायः ॥ ६ ॥[2]



---

१ अत उत्तरमन्तिमस्य पत्रस्य नष्टत्वाद् ग्रन्थभागो नास्ति आ पुस्तके.

२ अत उत्तरम् "ॐ नमो नारायणाय सर्वात्मा श्रीसीताराम लिहिता तद्भक्त नाना अत्रि ॥ छ ॥" इत्यधिकम् अ पुस्तके.

PUBLICATIONS

of

The Scindia Oriental Institute

UJJAIN

1. तत्वसार (Marathi)—composed in 1312 A C. by Cāṅgadeva Vaṭeśvara, a contemporary of the celebrated Marathi poet and saint Jñāneśvara This unique work was discovered and published by the Institute in 1936 Editor : **Dr. H. R. Diwekar**, M. A., D. Litt., Sāhityācārya. Crown 8vo, 105 pages with 2 photoprints. —Rupee One

2. अलङ्कारमञ्जूषा (Scindia Oriental Series No. 1)— a Sanskrit treatise on poetic figures by Devaśaṅkara Purohita (*c.* 1765 A. C.). The illustrative verses eulogise some Peshwas of Poona. Editor : **Sadashiva L. Katre**, M.A. Demy 8vo, 384 pages. —Rupees four

3. **Ancient Jaina Hymns** (Scindia Oriental Series No. 2) —containing a Middle Gujarati and seven Sanskrit rare stotras composed by authors of the Śvetāmbara Jaina sect. Editor: **Dr. Charlotte Krause**, Ph. D. —In Press

4. शास्त्रनस्त्वविनिर्णय (Scindia Oriental Series No. 3)— a Sanskrit rejoinder to John Muir's *Mataparīkṣā* by Nīlakaṇṭha (Father Nehemiah Goreh). This work refuting the doctrines of Christianity and defending those of Hinduism was composed by the author *c.* 1844 A.C , i.e. four years before his conversion. Editor : **Sadashiva L. Katre**, M. A. Demy 8vo, 136 pages. —Rupees five

5. अविमुक्ततत्त्वम्—A Sanskrit compendium on the philosophy of the holy city of Banaras, ascribed to Bhavānī, the step-mother of the renowned author Bālambhaṭṭa Pāyagunḍe (*c.* 1780 A. C.). —In progress

---

1. CATALOGUE OF MANUSCRIPTS IN THE INSTITUTE'S LIBRARY

Part I (1936)—Annas four
Part II (1941)—Annas four
Further parts in preparation.

2. DESCRIPTIVE CATALOGUE OF MANUSCRIPTS IN THE INSTITUTE'S LIBRARY

—10,000 entries. —In progress

Vikrama Volumes in commemoration of the completion of the 2nd millennium of the Vikrama Era published under the auspices of the Institute.

1. Vikrama Volume (English)—Rs. 15/-
2. विक्रम-स्मृति-ग्रन्थ (Hindi) —Rs. 20/-
3. विक्रमस्मृति (Marathi) —Rs. 10/-

Postage etc. extra in all cases.

The three Vikrama Volumes are obtainable from the Director of Archæology, M. B., Gwalior Fort.

For the rest, apply to:—

The Curator
Scindia Oriental Institute
UJJAIN (M. B.—India)